
The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY :-
SHREE P.H.KARANI
Date 17-10-2008

॥ सांख्यतत्त्वकौमुदी॥ ग्रंथसंख्या १०५६ ॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

श्रीगणेशायनमः॥ श्रीशिवायनमः॥अजामेकांलोहितशुक्लकृष्णांबह्वीः प्रजाः सृज्यमानांनमामः अजायेतांजुषमाणाभजेतेजहत्येनांभुक्तभोगांनुमस्तान् १ कपिलायमहामुनयेमुनयेशिष्यायतस्यचासुरये पंचशिखायतथेश्वरकृष्णायेतेनमस्यामः २ दुःखत्रयाभिघाताज्जिज्ञासातदपघातके हेतौ दृष्टेसापार्थाचेन्नैकांतात्यंततोऽभावात् ३ दृष्टवत्खलु प्रतिपित्सितमर्थं प्रतिपादयन्प्रतिपादयितावधेयवचनोभवतिप्रेक्षावतां अप्रतिपित्सितंतु प्रतिपादयंन्नासौलोकिकोनवापरीक्षकइतिप्रेक्षावद्भिरुन्मत्तवदुपेक्षणीयः सचैषांप्रतिपीप्सितोर्थो योज्ञातःसन्परमपुरुषार्थायकल्पतइतिप्रारीप्सितशास्त्रविषयज्ञानस्यपरमपुरुषार्थसाधनत्वात्तद्धेतुकांतद्विषयजिज्ञासामवतारयति दुःखत्रयाभिघाताज्जिज्ञासातदपघातकेहेताविति एवंहिशास्त्रविषयोनजिज्ञास्येत यदिदुःखंनामजगतिनस्यात् यद्वानजिहासितंजिहासितंवाअशक्यसमुच्छेदं अशक्यसमुच्छेदत्वाच्चद्विधा दुःखस्यनिस्तत्वाद्वानदुच्छेदोपायापरिज्ञानाद्वा शक्यसमुच्छेदकेपिचशास्त्रविषयज्ञास्यानुपायादासुकरस्योपायांतरस्यसद्भावाद्वा तत्रनतावद्दुःखंनास्तिनाप्यजिहासितमित्युक्तंदुःखत्रयाभिघातादिति दुःखानांत्रयंदुःखत्रयं तत्रवलुआध्यात्मिकंचाधिभौतिकंचाधिदैविकंचेतिनत्राध्यात्मिकंद्विविधं शारीरंवातपित्तश्लेष्मसंचाशारीरंकर्मानाबंधनिमित्तं मानसंकामक्रोधलोभमोहेर्ष्याविषादविशोकादर्शननिबंधनं सर्वंचैतदौत्तरोपायसाध्यत्वादाध्यात्मिकंदुःखं ब्राह्मोपायसाध्यंदुःखंत्रेधा आधिभौतिकमाधिदैविकंच तत्राधिभौतिकंमानुषपक्षिपशुमृगसरीसृपस्थावरनिमित्तं आधिदैविकंचयक्षराक्षसविनायकग्रहाद्यावेशनिबंधनं तदेतत्रयंस्वात्मावेदनीयंदुःखंरजःपरिणामभेदान्नशक्यतेप्रत्याख्यातुं तदनेनदुःखत्रयेणांतःकरणवर्त्तिनाचेतनाश्रा

कः प्रतिकूलतयाभिसंबंधोभिघातः एतावताप्रतिकूलवेदनीयंजिज्ञासार्हतुरुक्तः यद्यपिन सेनिरुध्यते
दुःखंतथापितदभि भवःशक्यःकर्तुमित्युपरिष्टादुपपादयिष्यते तथाचोपपन्नंतदपघातकेहेतावि
ति तस्यदुःखत्रयस्यापघातकस्तदपघातकःउपसर्जनस्यापिबुध्यानिःरुध्यतदाचशब्देनपरामर्शः अ
पघातकश्चहेतुः शास्त्रव्युत्पाद्योनान्यइत्यर्थः अत्रशंकते दृष्टसोपार्थोचेत् अयमर्थः अस्तुदुःखत्रय
जिज्ञासितेचनद्भवतु भवतुचतत्प्रशक्यज्ञानसहितंचशास्त्रगम्यउपायस्तदुच्छेत्तु तथाप्यत्रप्रेक्षावतोजि
ज्ञासानयुक्तादृष्टस्यैवोपायस्यतदुच्छेदकस्यसुकरस्यविद्यमानत्वात् तत्वज्ञानस्यानेकजन्माभ्यासप
रंपरायाससाध्यतयातिदुःकरत्वात् तथाचलौकिकानामाभाणकः अर्कंचेन्मधुविंदेतकिमर्थंपर्वतंव्र
जेत् इष्टस्यार्थस्यसंसिद्धौकोविद्वान्यत्नमाचरेदिति संतिचोपायाःशतशः शरीरदुःखप्रतीकाराय
षत्करोभिषजांवैरुपदिष्टाः मानसस्यापितापस्यप्रतीकारायमंजुस्त्रीपानभोजनविलेपनवस्त्रालं
कारविषयग्रामिरूपायईषत्करः एवमाधिभौतिकस्यदुःखस्यनीतिशास्त्राभ्यासकुशलतानिरस्यय
स्थानाध्यासनादिःप्रतीकारहेतुरीषत्करः तथाआधिदैविकस्यदुःखस्यमणिमंत्राद्युपयोगःसुकरः
प्रतीकारोपायइति नेति निराकरोति कुतः एकांतात्यंततोभावात् एकांतोदुःखनिवृत्तेरवश्यंभावः अ
त्यंतोदुःखस्यनिवृत्तस्यपुनरनुत्पादः तयोरेकांतात्यंततयोरभावः एकांतात्यंततोभावःषष्ठीद्विवचनस्था
नेसार्वविभक्तिकःतसिः एतदुक्तंभवति यथाविधिरसायनकामिनीनीतिशास्त्राभ्यासमंत्राद्युपाय
योगेपितस्याध्यात्मीकादेःदुःखस्यनिवृत्तेरदर्शनात् अनेकांतिकत्वेनिवृत्तस्यापिपुनरुत्पत्तिदर्शना
दनात्यंतिकत्वमिति सुकरोप्येकांतिकात्यंतिकदुःखनिवृत्तेर्नदृष्टउपायइतिनापार्थोजिज्ञासेत्यर्थः
यद्यपिदुःखममांगत्यंतथापितदपघातोमांगल्यएवेतियुक्तेशास्त्रस्यादौतत्संकीर्तनं दृष्टवदानुश्रवि

२

105/1

कःसत्वविशुध्यिक्षयातिशययुक्तः तद्विपरीतःश्रेयान्व्यक्ताव्यक्तज्ञविज्ञानात् स्यादेतत् माभूद्दृष्टउपायो
वैदिकस्तुज्योतिष्टोमादिःसहस्रवत्सरपर्यंतः कर्मकलापः तापत्रयमेकांतमत्यंतंवापनेष्यति श्रूयते
हिस्वर्गकामोयजेतेतिस्वर्गस्तुपन्नदुःखेनसंभिन्नेनचग्रस्तमनंतरं अभिलाषोपनीतंचतत्सुखंस्वःप
दाभ्यदं दुःखविरोधीसुखविशेषः सचस्वसंनयासमूलत्वात्मपुनर्दुःखानुषक्षयः तथाहिश्रूयते
अपामसोममभूमाअभूमेतितत्क्षयेकुतोअमृतत्वसंभवः तस्माद्वैदिकस्यतापत्रयप्रतीकारहेतोर्मुहूर्तया
मादीरात्रमासादिनिर्वर्तनीयस्यानेकजन्मपरंपरायाससंपादनीयाद्विवेकज्ञानादीषत्करत्वात्पुनरपिजि
ज्ञासाव्यर्थत्यशंक्याह दृष्टवदानुश्रविकइति गुरुपाठादनुश्रूयतइत्यनुश्रवोवेदः एतदुक्तंभवति श्रूयतेन
तुकेनचिक्रियतेइतितत्रभवइत्यानुश्रविकः तत्रप्राप्तोज्ञातइतियावत् आनुश्रविकोपिकर्मकलापोदृष्टे
नतुल्योवर्तते इतिएकांतआत्यंतिकदुःखप्रतीकारानुपायत्वस्योभयत्रापितुल्यत्वात् यद्यपिचानुश्रविक
इतिसामान्येनाभिहितंतथापिकर्मकलापोद्रष्टव्यः विवेकज्ञानस्याप्यानुश्रविकत्वात् तथाचानुश्रूयते
असावात्माज्ञातव्यः श्रुतिर्नोविवेक्तव्योनसपुनरावर्तेतेनसपुनरावर्तंतइति अस्यांप्रतिज्ञायांहेतुमाह
सत्वविशुध्यिक्षयातिशययुक्तः अविशुद्धिःसोमादियागस्यपशुबीजादिवधसाधनता यथाहस्मात्रभ
गवान्पंचशिखाचार्यः स्वल्पःसंकरःसपरिहरःसह्यस्त्वमर्शइति स्वल्पःसंकरःज्योतिष्टोमादिजन्म
नःप्रधानापूर्वस्यपशुहिंसादिजन्मनानर्थहेतुनाऽपूर्वेणसपरिहरःशक्योहिकियतापायश्चित्तेन
परिहर्तुं अथचप्रमादतःप्रायश्चित्तमपिनाचरितंप्रधानविपाकसमयेचपच्यते तथापियावदसाव
नर्थंप्रसूतेतावत्सह्यत्वमर्षः मृष्यंतेहिपुण्यसंभारोपनीतस्वर्गसुधाह्रदावगाहिनःकुशलाःपापमा
त्रापपादितदुःखबन्दिकणिकानचनहिंस्यात्सर्वमेतानीतिसामान्यशास्त्रेविशेषशास्त्रेणाग्नीषोमीये

पशुमालभेतेत्यनेनबाध्यतइतियुक्तंविरोधाभावात् विरोधेहिबलीयसादुर्बलंबाध्यतइति अत्रनकश्चिदस्ति
विरोधोभिन्नविषयत्वात् तथानहिस्यादितिनिषेधेनहिंसायाअनर्थभावोज्ञाप्यते ननुअकृत्वर्थमपिन
चानर्थहेतुत्वंकृतूपकारकत्वयोः कश्चिदस्तिविरोधः सहिपुरुषस्यदोषमाचष्टेतंकृतोश्रोपकरिष्यति क्ष
यातिशयोचफलगतावप्युपायउपचरितो क्षयित्वंचस्वर्गादेः सत्वेसतिकार्यत्वादनुमितं ज्योतिष्टोमादयःस्व
र्गमात्रसाधनं वाजपेयादयस्तुस्वाराज्यस्येत्यतिशायत्वमुक्तं परसंपदुत्कर्षोहिहीनसंपदं पुरुषंदुःखाकरो
ति अपामसोममभूमताअभूमेतिचामृतत्वाभिधानेचिरस्थानमुपलक्षयति यदाहुराभूतसंप्लवस्थानममृतत्वं
हिभाष्यतइति अतएवचश्रुतिः नकर्मणानप्रजयाधनेनत्यागेनैकेनामृतत्वमानशुः परेणनाकंनिहितगु
हायांविभ्राजतेयद्यतयोविशंतितथाकर्मणामृत्युमृषयोनिषेदुः प्रजावंतोद्रविणमिच्छमानाः तथापरेऋषि
योमनीषीणःपरकर्मभ्योऽमृतत्वमानशुरिति तदेतत्सर्वमभिप्रेत्यात् तर्हिपरीतःश्रेयान्व्यक्ताव्यक्तज्ञवि
ज्ञानात् तस्मादानुश्रविकादुःखोपघातकादुपायात्सोमपानादेरविशुध्यादनित्यसातिशयफलस्ययुक्त
भावस्वरूपस्यकार्यस्यतथाभावात् दुःखप्रध्वंसस्यतुकार्यस्यापितद्वैपरीत्यात् तर्हिपरीतोविशुद्धोहिंसा
दिसंकराभावात् नित्यनिरतिशयफलोसलद्पुनरावृत्तिश्रुतेः नचकार्यत्वेनानित्यताफलस्य नचदुःखांतरो
त्पादकारणाप्रवृत्तोकार्यानुत्पादात् विवेकज्ञानोपजननपर्यंतत्वाच्चकारणप्रवृत्तेःएतच्चोपरिष्टादुपपाद
यिष्यते अक्षरार्थंस्तुतस्मादानुश्रविकादुःखोपघातकादेतोर्विपरीतः सत्पुरुषान्यताप्रत्ययः साक्षात्कारोदुःखोप
घातकोहेतुः अतएवश्रेयानआनुश्रविकोहिवेदविहितत्वात्तन्मात्रयादुःखोपघातकत्वाच्चप्रशस्यः सत्पुरुषान्यता प्र
त्ययोपिप्रशस्यस्तदनयोः प्रशस्ययोर्मध्येसत्पुरुषान्यताप्रत्ययःश्रेयान् कुतःपुनरस्योत्पत्तिरित्यतउक्तं व्यक्ता
व्यक्तज्ञविज्ञानादिति व्यक्तेचाव्यक्तेचज्ञश्चव्यक्तव्यक्तज्ञाःतेषांविज्ञानेविवेकेनज्ञानेव्यक्ताव्यक्तज्ञविज्ञानं व्य
क्तज्ञानपूर्वकमव्यक्तस्यतत्कारणस्यज्ञानेतयोः पारमार्थ्येनात्मापरोज्ञायतइतिज्ञानक्रमेणक्रमाभिधानं

एतदुक्तंभवतिश्रुतिस्मृतीतिहासपुराणेभ्योव्यक्तादीनविवेकेनश्रुत्वाशास्त्रयुक्त्याचव्यवस्थाप्यदीर्घकालो
दंनैरंतर्यसत्कारसंचितात् भावनाप्रयात्विज्ञानादितितथावक्ष्यति एवंतत्वाभ्यासान्नास्मिनमेनाहमि
त्यपरिशेषंअविपर्ययात्विशुद्धंकेवलमुत्पद्यतेविज्ञानमिति मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृ
तयः सप्तसोऽहंकस्तुविकारोनप्रकृतिर्नविकृतिः पुरुषः तदेवंप्रेक्षावत्पेक्षितार्थत्वेनशास्त्रारंभंसमा
धायशास्त्रमारभमाणः श्रोतृबुद्धिसमाधानायतदेवंसंक्षेपतः प्रतिजानीते मूलप्रकृतिरित्यादिना संक्षे
पतोहिशास्त्रार्थस्यचतस्रोविधाः कश्चिदर्थः प्रकृतिरेवकश्चित्प्रकृतिविकृतिरेवाकश्चिद्विकृतिरेवक
श्चिदनुभयरूपः तत्रकाप्रकृतिरेवेत्यतउक्तं मूलप्रकृतिरविकृतिः प्रकरोतीतिप्रकृतिः प्रधानंसत्वरज
स्तमसांसाम्यावस्थासाविकृतिः प्रकृतिरेवेत्यर्थः कस्मादित्यतउक्तंमूलेति मूलंचासौप्रकृतिश्चेतिमूल
प्रकृतिः विश्वस्यकार्यसंघातस्यसामूलंतत्वस्यमूलांतरमजनेवस्थाप्रसंगात् नचानवस्थायांप्रमाणम
स्तीतिभावः कतमाःपुनः प्रकृतिविकृतयःकियत्यश्चेत्यतउक्तं महदाद्याः प्रकृतिविकृतयःसप्त प्रकृत
यश्चताःविकृतयश्चइतिप्रकृतिविकृतयःसप्त तथाहि महत्तत्वंअहंकारस्यप्रकृतिर्विकृतिश्चमूलप्रकृतेः
एवमहंकारतत्वंतन्मात्राणामिंद्रियाणांचप्रकृतिः विकृतिश्चमहतः एवंपंचतन्मात्राणिभूतानामाका
शादीनांप्रकृतयोविकृतयश्चाहंकारस्य अथकाविकृतिरेवकियतीचेत्यतउक्तं षोऽशकस्तुविकारइति
षोऽशसंख्यापरिमितोगणः षोऽशकः तुशब्दोऽवधारणेभिन्नक्रमः पंचभूतानिएकादशेंद्रियाणीतिषो
ऽशकोगणोविकारएवन प्रकृतिः यद्यपिपृथिव्यादीनामपिगोबदरवृक्षादयोविकाराः एवंतद्विकारभे
दानांपयोबीजादीनांदध्यंकुरादयः तथापिगवादयोबीजादयोन पृथिव्यादिभ्यस्तत्वांतरं तत्वांतरोपा
दानत्वंचप्रकृतित्वमित्यभिप्रेतमितिनदोषः सर्वेषांगोबदरादीनांस्थूलत्वेंद्रियग्राह्यताचसमेतिनतत्वांत

रं अनुभयमाहानप्रकृतिर्नविकृतिपुरुषइति एतत्सर्वमुपपादयिष्यते तमिमर्थं प्रामाणिकं कर्तुमभि
मताः प्रमाणभेदालक्षणीयाः नचसामान्यलक्षणमंतरेणशक्यंविशेषलक्षणं कर्तुमिति प्रमाण
सामान्येतावल्लक्षयति दृष्टमनुमानमागमश्चवचनेचसर्वप्रमाणासिद्धत्वात् त्रिविधं प्रमाणमिष्टं प्रमेयसि
द्धिः प्रमाणाद्धिः अत्रचप्रमाणामितिसमाख्यालक्ष्यपदं तन्निर्वचनेचसर्वंलक्षणं प्रमीयतेनेनेतिनि
र्वचनात्समाप्रतिकरणत्वंगम्यते असंदिग्धाऽविपरीताऽनधिगतविषयाचिनवृत्तिबोधः पौरुषेयः फ
लप्रमातृसाधनंप्रमाणमितिसंशयविपर्यपस्मृतिसाधनेषुअप्रमाणेष्वप्रसंगः संख्याविप्रतिपत्ति
निराकरोति त्रिविधमिति तिस्रोविधायस्यप्रमाणसामान्यस्येतित्रिविधंनेन्यूनेनाप्यधिकमित्यर्थः
विशेषलक्षणानेतरचेतदुपपादयिष्यामः कतमास्त्रिविधाइत्यतआह दृष्टमनुमानमागमश्चवचनेचेति
एतच्चलौकिकप्रमाणाभिप्रायमिति लोकव्युत्पादनार्थत्वाच्छास्त्रस्यतस्यैवात्राधिकारात् आर्षंतुविज्ञा
नं योगिनांनलौकिकव्युत्पादनायालमितिसदपिनाभिहितंअनधिकारात्स्यादेतन्माभून्न्यूनमधिकं
तुकस्मान्नभवति संगिरंतेहिवादिनउपमानादीन्यपिप्रमाणानीत्यतआह सर्वप्रमाणसिद्धत्वात् ए
षवदृष्टानुमानागमवचनेषुसर्वेषांप्रमाणानांसिद्धत्वान्नदंतर्भावादित्यर्थः एतच्चोपपादयिष्यतइत्युक्तं
अथप्रमेयव्युत्पादनायप्रकृतेशास्त्रेकस्मात्सामान्यतोविशेषतश्चप्रमाणंलक्षयतीत्यतःआह प्रमे
यसिध्यिंप्रमाणाद्धीतिसिध्यिः प्रतीतिः सेयमार्यार्थंक्रमानुरोधेनपाठक्रममनादृत्यव्याख्याता सं
प्रतिप्रमाणविशेषलक्षणावसरेप्रत्यक्षस्यप्रमाणेषुज्येष्ठत्वात्तदधीनत्वाच्चप्रतिवादिनामविप्रतिपत्ते
श्चतदेवतावल्लक्षयति प्रतिविषयाध्यवसायोदृष्टंत्रिविधमनुमानमाख्यातं तल्लिंगलिंगिपूर्वकमा
मश्रुतिरागमवचनंतु अत्रदृष्टमितिलक्ष्यनिर्देशः परिशिष्टंतुलक्षणं समानासमानजातीयव्यवच्छेदो

109/198

लक्षणार्थः अवयवार्थस्तुविषयवतिविषयिणमनुबुध्यतेस्वेनरूपेणनिरूपणीयंकुर्वंतीतियावत् विष
याः पृथिव्यादयःसुखादयश्चास्मदादीनामविषयाश्चतन्मात्रलक्षणायोगिनामूर्ध्वस्रोतसांचविषया
विषयविषयंप्रतिप्रवर्तनइति प्रतिविषयंइंद्रियंचेत्तिश्चसंनिकर्षःअर्थसंनिकृष्टमित्यर्थः तस्मिन्नध्य
वसायस्तदाश्रितइत्यर्थः अध्यवसायश्चबुध्यिव्यापारोज्ञानं उपात्तविषयाणामिंद्रियाणांवृत्तौसत्यां बु
ध्यिसत्वमभिभवेसति यःसत्वसमुद्रेकःसोध्यवसायइतिवृत्तिरिति चज्ञानमिति चाख्यायतो इदंतत्प्रमाण
मनेनयःचेतनाशक्तेरनुग्रहस्तत्फलंप्रमाबोधः बुधिसत्वंप्राकृततत्वादचेतनमितितदीयोव्यवसोप्यचे
तनः घटादिवत् एवंहिबुधिसत्वस्यसुखादयोपिपरिणामभेदाअचेतनाः पुरुषस्तुसुखाद्यननुषंगीचे
तनः सायंबुधिसत्ववर्तिनाज्ञानसुखादिनात्मप्रतिबिंबितस्वछायापत्त्याज्ञानसुखादिमानिवभवतीतिचे
तनानुग्रह्यते चितिछायायत्त्याचाचेतनापिबुधिस्तदध्यवसायश्चचेतनइवभवतीतियथावक्ष्यति तस्मा
त्तत्संयोगादचेतनंचेतनावदिवलिंगं गुणकर्तृत्वेपितथाकर्तेवभवत्युदासीनः अत्राध्यवसायग्रहणेन
संशयंव्यवच्छिनत्ति संशयस्यानवस्थितग्रहणनानिश्चितरूपत्वात् निश्चयोध्यवसायइतिचनार्थांत
रं विषयग्रहणेनासद्विषयंविपर्ययमपाकरोति प्रतिग्रहणनचेंद्रियार्थसंनिकर्षसूचनादनुमानस्मृत्या
दयश्चापाकृतभवंति तदेवंसमानासमानजातीयव्यवच्छेदकत्वात् प्रतिविषयाध्यवसायइतिदृष्टस्यसं
पूर्णलक्षणं लक्षणांतराणितेर्थिकानांनभूषितानिनदूषितानिविस्तरभयादिति नानुमान प्रमाणमि
तिवदतालोकायतिकेनाप्रतिपन्नःसंदिग्धोविपर्यस्तोवापुरुषः कथंप्रतिपाद्यते नचपुरुषांतरगताअ
ज्ञानसंदेहविपर्ययाःशक्याअर्वाग्दृशाप्रत्यक्षेणप्रतिपत्तुं नापिमानांतरेणनभ्युपगमात् अनवधृता
ज्ञानसंदेहसंशयविपर्यासस्तुयंकंचित्पुरुषंप्रतिवर्तमानोऽनवधेयवचनतयाप्रेक्षावद्भिरुन्मत्तवदुपे
क्षेतानदनेनाज्ञानादयःपरपुरुषवर्तिनोभिप्रायभेदाद्वचनभेदाद्विंगादनुमातव्याइत्यकामेनाप्यनुमा

नमभ्युपेयं तत्रप्रत्यक्षकार्यत्वादनुमानेप्रत्यक्षानंतरंलक्षणीयं तत्रापिसामान्यलक्षणपूर्वकत्वाद्विशेष
लक्षणस्यानुमानसामान्यंतावल्लक्षयति लिंगलिंगिपूर्वकमितिलिंगव्याप्यंलिंगिव्यापकं शोकितस
मारोपितोपाधिनिराकरणेनस्वभावप्रतिबंधंव्याप्यं येनप्रतिबद्धंतव्यापकं लिंगलिंगिग्रहणेनविष
यवाचिनाविषयिणंप्रत्ययमुपलक्षयतिधूमादिर्व्याप्योवन्ह्यादिर्व्यापकइतियःप्रत्ययस्तत्पूर्वकलिं
गिग्रहणंचावतंनीयं तेनचलिंगमस्यास्तीतिपक्षधर्मताज्ञानमपिदर्शितंभवति तव्याप्यव्यापकपक्ष
धर्मताज्ञानपूर्वकमनुमानमिति अनुमानसामान्यंलक्षितं अनुमानविशेषास्तत्रातरलक्षितान्स्मारय
ति त्रिविधमनुमानमिति तत्सामान्यंतोलक्षितंविशेषतःत्रिविधं पूर्ववत्शेषवत्सामान्यतोदृष्टंचे
ति तत्रप्रथमतस्तावद्विविधंवीतमवीतंच अन्वयमुखेनप्रवर्तमानंविधायकंवीतं व्यतिरेकमुखेन
प्रवर्त्तमानंनिषेधकमवीतं तत्रावीतं शेषवत् शिष्यंतेपरिशिष्यतेशेषःसएवविषयतयायस्यासिअ
नुमानज्ञानस्यतच्छेषवत् यदाहुःप्रसक्तप्रतिषेधेन्यत्राप्रसंगात्शिष्यमाणेसंप्रत्ययइति अस्यवा
वीतस्यव्यतिरेकिणउदाहरणंअग्रेभिधास्यतइति वितंचद्वेधा पूर्ववत्सामान्यतोदृष्टंचेति परिशेष
दृष्टस्वलक्षणंसामान्यविषयंयत् तत्पूर्ववत्दृष्टाव्यक्तियस्यसामान्यस्यस्यार्थः पूर्वदृष्टस्वलक्षणसामा
न्यमितियावत् तदस्यविषयंतेनास्तिअनुमानज्ञानस्येति पूर्ववत् यथाधूमोदर्वन्हित्वसामान्यविशे
षःपर्वतेअनुमीयते तस्यवन्हित्वसामान्यविशेषस्यस्वलक्षणंवन्हिविशेषोदृष्टरूपवत्वेअपरंचवी
तेसामान्यतोदृष्टमदृष्टस्वलक्षणसामान्यविषयंअनुमानं यथेंद्रियादिविषयमनुमानं अत्रहिरूपादि
ज्ञानानांक्रियात्वेनकरणवत्वमनुमीयते यद्यपिकरणत्वसामान्यस्यछिदादौवास्यादिस्वलक्षणमुप
लब्धं तथापियज्ज्ञातीयंरूपादिज्ञानेकरणमनुमीयतेतज्ज्ञातीयस्यकरणत्वस्यनदृष्टंस्वलक्षणंप्रत्य

क्षेणेंद्रियजातीयंहितत्करणं नचेंद्रियत्वस्यसामान्यस्यस्वलक्षणंइंद्रियंप्रत्यक्षगोचरोवाऽज्ञा यथाव
न्हित्वसामान्यस्यस्वलक्षणवन्हिः सोयंपूर्ववतःसामान्यतोदृष्टात्समपिवीतत्वेनतुल्यत्वेशेषः अत्रदृष्टं
दर्शनंसामान्यतइतिसामान्यस्यसार्वविभक्तिकस्तसिः अदृष्टस्वलक्षणस्यसामान्यस्यदर्शनमनुमा
नमित्यर्थः सर्वंचैतदस्माभिर्न्यायवार्त्तिकतात्पर्यटीकायांव्युत्पादितमितिनोक्तंविस्तरभयादिति श
ब्दस्यश्रवणसमनंतरं प्रयोज्यबुद्धप्रवृत्तिहेतुज्ञानानुमानपूर्वकत्वात् शब्दार्थसंबंधग्रहणस्यस्वार्थ
संबंधग्रहणकारणश्चशब्दस्यप्रत्ययकत्वात् अनुमानानंतरंशब्दंलक्षयति आप्तश्रुतिराप्तवचनं
मिति आप्तवचनमितिलक्ष्यनिर्देशः परिशिष्टंतुलक्षणंआप्ताप्तायुक्तेतियावत् आप्ताचासौ
श्रुतिश्चेतिआप्तश्रुतिः श्रुतिर्वाक्यंजनितंवाक्यार्थज्ञानेतच्चस्वतः प्रमाणंअपौरुषेयवेदजनित
त्वेनसकलदोषाशंकाविनिर्मुक्तंयुक्तंभवति एवंवेदमूलस्मृतीतिहासपुराणजनितमपिज्ञानं
युक्तंआदिविदुषश्चकल्पादौकल्पांतराधीतश्रुतिस्मरणसंभवः सुप्तप्रबुद्धस्येवपूर्वपुरवगतानां
मर्थानां तथाचाध्यजैगीषव्यसंवादेभगवान् जैगीषव्योदशमहाकल्पवर्त्तिजन्मस्मरणमात्मन
उवाचदशमहासर्गेषुविपरिवर्तमानेनमयेत्यादिसंदर्भेणआप्तवचनेनानायुक्ताः शाक्यभिक्षुनिर्ग्र
ंथकसंसारमोचनादीनामागमाभासाः परिहर्तांभवंति अयुक्तत्वंचैतेषांविज्ञानात् विच्छिन्नमूल
त्वात् प्रमाणविरुद्धार्थाभिधानात् कैश्चिदेवरूढ्यादिपुरुषापसदैःपशुप्रायैःपरिग्रहाद्धेतूक्तं
तुशब्देनानुमानात्व्यवच्छिनत्ति वाक्यार्थः प्रमेयोनतुतत्थमोवाक्यंयेननलिंगंभवेत् नचवाक्यं
वाक्यार्थबोधयत्संबंधग्रहंमपेक्ष्यते अभिनवकविविरचितस्यादृष्टपूर्वस्यानुभूतचरवाक्या
र्थबोधकत्वादिति एवंप्रमाणसामान्यलक्षणेषुतद्विशेषलक्षणेषुसत्सुयानिप्रमाणानराणि

पमानादीनीत्यादिभिरभ्युपेयंतेतान्युक्तलक्षणेषंवंतर्भवंतीति तथाहि उपमानंतावद्यथागौस्त
थागवयइति वाक्यंतज्ज्ञानिताधीरागमएवयोप्ययंगवयशब्दोगोसदृशस्यवाचकइतिप्रत्ययःसो
प्यनुमानमेव योहिशब्दोयत्रवृद्धैःप्रयुज्यंतेसोऽसन्निवर्त्तंतेतस्यवाचकोयथागोशब्दोगोत्वस्य
प्रयुज्यतेचैषगवयशब्दोगोसदृशइतितस्यैववाचकइतिज्ञानमनुमानमेव यत्तुगवयस्यचक्षुःसं
निकृष्टस्यगोसादृश्यज्ञानंतत्प्रत्यक्षंअनएवस्मर्यमाणायांगविगवयसादृश्यज्ञानंप्रत्यक्षंनत्व
न्यगविसादृश्यमत् गवयेभूयोवयवसामान्ययोगोजात्यंतरवर्त्तिजात्यंतरेसादृश्यमुच्यते सामा
न्ययोगश्चैकःसचैकत्रयेप्रत्यक्षोगव्यपिनयेति नोपमानस्यप्रमेयांतरमस्तियत्रप्रमाणंभवे
दितिनप्रमाणमुपमानमिति एवमर्थापत्तिरपिनप्रमाणांतरं जीवतश्चैत्रस्यगृहाभावदर्शनेन
बहिर्भावस्यादृष्टस्यकल्पनमर्थापत्तिरभिमतावद्वानां साप्यनुमानमेवायदाखलुसन्नेकत्रा
व्यापकएकत्रास्तितदान्यत्रनास्तीतिसुकरःस्वशरीरेव्याप्तिग्रहः तथासतोग्रहाभावदर्शनेनलिंग
नबहिर्भावदर्शनमनुमानमेव नचचैत्रस्यकचित्सत्वेनगृहाभावःशक्योज्ञातुंयेनासिद्धोगृहाभा
वोनहेतुःस्यात्नचगृहाभावेनचासत्वमपन्हयतेयेनसत्वमेवानुपपद्यमानमात्मानंनबहिरवस्था
पयेत् तथाहिचैत्रस्यगृहासत्वेनसत्वमात्रंवाविरुध्यते गृहसत्वंवा नतावद्यत्रकचनसत्वस्यापि
विरोधोगृहासत्वेनभिन्नविषयत्वात् देशसामान्येनगृहविशेषापेक्षेपोपिपाक्षिकइतिसमानवि
षयतयाविरोधमिच्छतोनप्रमाणनिश्चितस्यगृहेसत्वस्यपाक्षिकतयासांशयिकेनगृहसत्वेन
प्रतिक्षेपायोगात् नपिप्रमाणनिश्चितोगृहाभावः पाक्षिकमस्यगृहेसत्वंप्रतिक्षिपत्सत्वमपिप्रति

113/1935

क्षेत्सुसांशयिकत्वंचापनेतुमर्हतीतियुक्तं गृहावच्छिन्नेनचैत्राभावेनगृहेसत्वंविरुद्धत्वात्प्रतिक्षिप्य
तेननुसत्वमात्रं तस्यतत्रौदासीन्यात् तस्माद्गृहाभावेनसिद्धेनसतोबहिर्भावोनुमीयतइतियु
क्तं एतनविरुद्धयोःप्रमाणयोरविरोधापादनेविषयव्यवस्थयार्थापत्तेर्विषयइतिनिरस्तमवच्छि
न्नानवच्छिन्नयोर्विरोधाभावात् उदाहरणांतराणिचार्थापत्तेरनुमानेंतर्भावनीयानि तस्मान्नानु
मानप्रमाणांतरमर्थापत्तिरितिसिद्धं एवमभावोपिप्रत्यक्षमेवनहिभूतरूपस्यपरिणामविशेषा
त्कैवल्यलक्षणादन्योह्यभावोनामप्रतिक्षणपरिणामिनोहिसर्वएवभावास्तेनेवतिशक्तेःस
चपरिणामभेदेंद्रियकइतिनास्तिप्रत्यक्षानवरुद्धोपिविषयोयत्राभावाख्यंप्रमाणांतरमभ्युपे
यमिति संभवस्तुयथाखार्योद्रोणाढकप्रस्थावगमःसचानुमानमेवखारीत्वंद्रोणाद्यविनाभूतंप्रती
तेरखार्यांद्रोणादिसत्वमवगमयतीति यश्चानिर्दिष्टप्रवक्रकंप्रवादमात्रमितिहोचुर्द्वाडयेतित्व
यैतद्वरंयक्षःप्रतिवसतीतिनतत्प्रमाणमनिर्दिष्टप्रवक्रकत्वेनसांशयिकत्वात् आप्तवक्तृनि
श्चयेत्वागमइत्युपपन्नत्रिविधंप्रमाणमिति एवंतावद्व्यक्ताव्यक्तज्ञलक्षणप्रमेयसिध्यर्थंप्रमाणा
न्युक्तानितानि तत्रव्यक्तंपृथिव्यादिस्वरूपतःपांसुरूपादोपिप्रत्यक्षतःप्रतिपद्यते पूर्ववच्चानुमा
नेनधूमादिदर्शनाद्वह्न्यादिति तत्कुत्पादनायमंदप्रयोजनेशास्त्रमितिदुरधिगममनेनव्युत्पा
द्यंतत्रयत्प्रमाणंयत्रशक्तंतदुक्तप्रमाणेभ्योनिःशेषदर्शयति सामान्यतस्तुदृष्टादतींद्रियाणां
प्रतीतिरनुमानात् तस्मादपिचासिद्धंपरोक्षमागमात्सिद्धंतुशब्दःप्रत्यक्षपूर्ववत्र्योविशिनष्टि
सामान्यतोदृष्टादध्यवसायातींद्रियाणांप्रधानपुरुषादीनांप्रतीतिः चितिछायापत्तिर्बुद्धेरध्यवसा

यइत्यर्थः उपलक्षणंचैतत् शोषवतइत्यपिद्रष्टव्यं तत्किं सर्वेषतींद्रियेषु सामान्यतोदृष्टमेवप्रवर्तते तथा
चयत्र तच्चास्मिन्दृष्टाधारंभक्रमेखर्गापूर्वदेवतादौचतेषामभावः प्राप्तइत्यतआह् तस्मादपिचासिद्धं
तस्मादपीत्येतावतैवसिद्धेचकोरेणशोषवतइत्यपिसमुचितं स्यादेतत् यथागगनकुसुमकूर्मरोमनर
विषाणादिषु प्रत्यक्षमप्रवर्तमानमेतदभावमवगमयति एवंप्रधानादिष्वपि तत्कथंतेषांसामान्यतोदृ
ष्टादिभ्यः सिद्धिरित्यतआह् अतिदूरात्सामीप्यादिंद्रियघातान्मनोनवस्थानात् सौक्ष्म्याव्यवधानाद
भिभवात्समानाभिहाराच्च अनुपलब्धिरितिवक्ष्यमाणंसिंहावलोकितन्यायेनानुषंजनीयं यथाउत्प
तन्वियतिपतत्रीअतिदूरतयासन्नपिप्रत्यक्षेणनोपलभ्यते सामीप्यादित्रापितिरनुषंजनीयः य
थालोचनस्थमंजनमतिसामीप्यान्नदृश्यते इंद्रियघातोंधत्वबाधिर्यादिः मनोनवस्थानात् यथाका
मायुपहितमनाः स्त्रीनालोकवर्तिनंइंद्रियसन्निकृष्टमर्थंनपश्यति सौक्ष्म्यात् यथेंद्रियसंन्निकृष्टंपर
माण्वादिप्रणिहितमनाअपिनपश्यति व्यवधानात् यथाकुड्यादिव्यवहितंराजदारादिनपश्यति अभि
भवात् यथासौरीभिर्भाभिरभिभूतंग्रहनक्षत्रमंउलंनपश्यति समानाभिहारात् यथातोयदाविमुक्तो
दबिंदून् जलाशयेनपश्यति चकारोनुक्तसमुच्चयार्थः तेनानुभवोपिसगृहीतः तद्यथाक्षीरावस्था
योदध्यादिअनुभवान्नदृश्यतेएतदुक्तंभवति नप्रत्यक्षनिवृत्तिमात्रादसत्त्वभावोभवति अतिप्रसं
गात् तथाहि गृहादिनिर्गतोगृहजनमपश्यंस्तदभावंविनिश्चिनुयात् अपितुयोग्यप्रत्यक्षनिवृत्ते
रयमभावंविनिश्चिनोतिनचप्रधानपुरुषादीनामस्तिप्रत्यक्षयोग्यतेति तन्निवृत्तिमात्रान्नतदभा
वनिश्चयोयुक्तः प्रामाणिकानामिति कृतमत्युनरेषुकारणंप्रधानादीनामनुपलब्धावित्यतआह् सो

क्ष्मान्नदनुपलब्धिर्नाभावात्कार्यतस्तदुपलब्धेः महदादिवच्चकार्यंप्रकृतिसरूपंविरूपंच अथाभाव
देवसमग्ररसवदेनेषामनुपलब्धिः कस्मान्नभवतीत्यतआह् नाभावात्कुतः कार्यतस्तदुपलब्धेः त
दितिप्रधानंपरामृशति पुरुषोपलब्धेतुप्रमाणंवक्ष्यति संघातपरार्थत्वादिति दृष्टतरप्रमाणाव
धारितेहिप्रत्यक्षमप्रवर्तमानमयोग्यत्वान्नप्रवर्तनइतिकल्प्यते समग्रस्तुरसोनप्रमाणेनावि
धारितइतिननत्रप्रत्यक्षयोग्यताशक्याध्यवसातुमित्यभिप्रायः किंपुनस्तत्कार्यंयतः प्रधानानुमा
नमित्यतआह् महदादितच्चकार्यं एतच्चयथागमकंयथापरिष्टादुपपादयिष्यते तस्यचकार्यस्य
विवेकज्ञानोपायंयोगिनीसारूप्यंवैरूप्येआह् प्रकृतिविरूपंसरूपंच एतेउपरिष्टाद्विभजनीयेइति
कार्यात्कारणमात्रंगम्यते सतिचात्रवादीनांविप्रतिपत्तयः केचिदाहुःअसतः सज्जायतेमुक्तस्यसंतो
विवर्तनः सतः सज्जायतइतिबुद्धाः तत्रपूर्वस्मिन्कल्पत्रयेप्रधानंनसिध्यति अन्येतुसतोसज्जायतेका
र्यजातंनवस्तुसदित्यपरेसुखदुःखमोहभेदवच्छब्दाद्यात्मकंहिजगत्कारणस्यप्रधानत्वंसत्वरजस्तम
स्वभावत्वं यदिपुनरसतःसज्जायतेअसन्निरूपाख्यंकारणंसुखादिरूपशब्दाद्यात्मकंकथंस्यात् स
दसतोस्वादात्स्यानुपपत्तेः अथापिसतोविवर्तनःशब्दादिप्रपंचस्तथापिसतःसज्जायतइतिनस्यात् न
चास्यादृश्यस्यप्रपंचात्मकत्वं अप्रपंचस्यप्रपंचात्मकतयाभासनंभ्रांतिरेव येषामपिकणभक्षाक्षच
रणादीनांसतएवकारणादसतोजन्मतेषामपिसदसतोरेकत्वानुपपत्तेर्नकार्यात्मकंकारणमितिन
प्रधानसिद्धिः अतःप्रधानसिध्यर्थंप्रथमंतावत्सत्कार्यं प्रतिजानीते असदकरणादुपादानग्रहणा
सर्वसंभवाभावात् शक्तस्यशक्यकरणात्कारणभावाच्चसत्कार्यं सत्कार्यं कारणव्यापारात्प्रागयी

तिशेषः तथाचनसिद्धसाधनेनव्यायिकतनयेरुद्भावनीये यद्यपिबीजमृत्पिंडादिप्रध्वंसानंतरमंकुरा
दयुत्पत्तिरुपलक्ष्यतेतथापिनप्रध्वंसस्यकारणत्वमपितुभावस्यैवबीजाद्यवयवस्य अत्राबाद्धाव
स्यात्तेनोतस्यसर्वत्रसुलभत्वात्सर्वत्रसर्वदासर्वकार्योत्पादप्रसंगइतिन्यायतात्पर्यटीकायामुप
पादितमस्माभिः प्रपंचप्रत्ययसुनअसतिबाधकेभ्रांतिरितिशक्यतेवक्तुं कणभक्षाक्षचरण
मतमवशिष्यते तत्रेदं प्रतिज्ञातंसत्कार्य्यमितिअत्रहेतुमाहअसदकरणात् असच्चेत्कारण
व्यापारापूर्वंकार्यनास्यसत्वेशक्यतेकर्तुं नहिनीलंशिल्पिसहस्त्रेणापिपीतंकर्तुंशक्यं वस्त्रस्यसद
सत्वेधर्मीविनिचेत् तथाप्यसतिधर्मिणिनतस्यधर्मइतिसत्वेतदवस्थमेव तथाचनासत्वं असंब
द्धेनातदात्मनावासत्वेनकथमसन्यवहः तस्मात् कारणव्यापारादूर्ध्वमिवनतः प्रागपिसदेव कार्यं
कारणाच्चास्यमतोभिव्यक्तिरवशिष्यते सतश्चाभिव्यक्तिरुपपन्नायथावद्यातेनधान्येषुतंडुलाना
मवपीडनेननतिलेषुतैलस्यदोहनेनसौरभेयीषुपयसः असतः करणेषुनिदर्शनंकिंचिदस्ति
नरवलुव्यज्यमानवोत्पद्यमानंवाक्वचिदसद्दृष्टम् इतश्चकारणव्यापारात्प्राक् सदेवकार्यमिष्ट
मुपादानग्रहणात् उपादानानिकारणानितेषांग्रहणंकार्येणउपादानेः कार्यस्यसंबधादि
तियावत् एतदुक्तंभवति कार्य्येणसंबद्धं कारणंकार्य्यस्यजनकसंबधश्चकारणेः कार्य्येस्याऽस
तोनसंभवतितस्मात्सदिति स्यादेतत् असंबद्धमेवकस्मात् कारणैः कार्य्यंनजन्यते तथाचास
देवोत्पत्स्यतेइत्यतआह सर्वसंभवाभावात् असंबद्धस्यजन्यत्वेसंबद्धत्वविशेषसर्वकार्यजातंस
र्वस्मात्संभवेत् नचैतदस्तितस्मात्सबध्यंसंबद्धेनजन्यते यथाहुः सांख्यवृद्धाःअसत्वाश्रास्तिसं

117/1935

बंधः कारणैः सत्वसंगिभिः असंबद्धस्यचोत्पत्तिमिच्छतोनव्यवस्थितिः स्यादेतत् असंबद्धमपित
देवकरोतियत्रयत्कारणंशक्तंशक्तिश्चकार्यदर्शनादवगम्यतेतेननाऽव्यवस्थाअतआहशक्तस्य
शक्यकरणात् साशक्तिः शक्तकारणाचयासर्वत्रवास्यात् शक्येवा सर्वत्रचेतनदवस्थेवाव्यवस्था
शक्येचेत् कथमसतिशक्येतत्रेतिवक्तव्यं शक्तिभेदएवेतादृशोयतः किंचिदेवकार्यंनसर्वमिति
चेत् हंत भोः शक्तिविशेषः कार्यसंबधोवासंबधोवास्यात् संबद्धत्वेनासतासंबंधइतिसत्कार्यं
असंबद्धत्वेसेवाव्यवस्थेतिसुष्ठुक्तंशक्तस्यशक्यकरणादिति इतश्चसत्कार्यमित्याह कारणभा
वाच्चकार्यस्यकारणात्मकत्वात् नहिकारणाद्भिन्नेकार्यंकारणेचसदितिकथंतद्भिन्नंकार्य्यम
सद्भवेत् कार्यस्यकारणाभेदसाधनानिप्रमाणानि नपटस्तंतुभ्योभिद्यतेतदुष्मत्वात् यद्यतो
भिद्यतेतत्रस्यधर्मोनभवतियथागोरश्वस्यधर्मश्चपटस्तंतूनाम् तस्मान्नार्थांतरं उपादानोपादेय
भावाच्चनार्थांतरत्वेनंतुपटयोः ययोरर्थांतरत्वेनतयोरुपादेयोपादानभावः यथाघटपटयोःउपा
दानोपादेयभावश्चतंतुपटयोः तस्मान्नार्थांतरत्वमिति इतश्चनार्थांतरत्वेतंतुपटयोः संयोगाप्रा
प्यभावात् अर्थांतरत्वेहि संयोगोदृष्टोयथाकुंडबदरयोः अप्राप्तिर्वायथाहिमवद्विंध्ययोः नचैव
संयोगाप्राप्तीनस्मान्नार्थांतरत्वमिति इतश्चपटस्तंतुभ्योनभिद्यतेगुरुत्वांतरकार्याग्रहणात् इहय
द्यस्माद्भिन्नेतस्यगुरुत्वांतरकार्य्यंगृह्यते यथापलिकस्यरुचकस्ययोगुरुत्वकार्योवनतिविशेषस
स्माद्विपलिकस्यखलिकस्यगुरुत्वकार्योवनतिविशेषोधिकः नतथातंतुगुरुत्वकार्यंपटगुरुत्व
कार्योतरंदृश्यते तस्मादभिन्नस्तंतुभ्यः पटइति तान्येतान्यवीतान्यभेदसाधनानि तदेवमभेदसि

119/1935

दृतंतवएवतेननतेनसंस्थानविशेषेणपरिणताःपथेनतंतुभ्योर्थांतरपटः आत्मनिक्रियाविरोधबुद्धि
व्यपदेशार्थक्रियाभेदाश्चनैकांतिकभेदसाधयितुमर्हंतिएकस्मिन्नपितन्नहिशेषाविर्भावतिरो
भावाभ्यामंतेषांविरोधाभावात् यथाहिकूर्मस्यांगानिकूर्मशरीरेनिविश्यमानानितिरोभवंतिचा
विर्भवंति नचकूर्मांतस्तदंगानिचोत्पद्यंतेध्वंसंतेवा एकमेकस्यामृदःसुवर्णस्यवाबद्धमुकुटाद्
योविशेषानिश्चस्तेआविर्भवन्नउत्पद्यंतइत्युच्यंते निविश्यमानास्तिरोभवंस्तोविनश्यंतीत्युच्यंते
नपुनरसतामुत्पादःसतामुत्पादःसतांवानिरोधः यथाहभगवान्कणभुग्दैपायनः नासतोवि
द्यंतेभावोनाभावोविद्यंतेसतइति यथाकूर्मः स्वावयवेभ्यःसंकोचविकाशिभ्योनभिन्नएवंब
द्धमुकुटादयोमृत्सुवर्णादिभ्योनभिन्नाः एवंचेहतंतुषुपटइत्यादिव्यपदेशोयथेहवनेतिलकइत्यु
पपन्नः नचार्थक्रियाभिदोभेदमापादयति एकस्यापिनानार्थक्रियस्यदर्शनात् यथाएकएव
वन्हिर्दाहकःपाचकश्चेति नाप्यर्थक्रियाव्यवस्थावस्तुभेदेहेतुः एषामेवसमस्तव्यस्तानांअर्थक्रियाव्य
वस्थादर्शनात् यथाग्रस्येकंविवक्षयावर्त्मदर्शनलक्षणामर्थक्रियांकुर्वंतिननुशिबिकावहनमिलि
तास्तुशिबिकांवहंति एवंतंतवःप्रत्येकंआवरणमकुर्वाणाअपिमेलिताआविर्भूतपटभावाःआवरि
ष्यंति स्यादेतत् आविर्भावःपटस्यकारणव्यापारात्प्राक्सन्नअसन्वा असंश्चेत्आयातर्हिअसदुपादा
नेअथसन् किंतेनतर्हिकारणेः नहिसतिकार्येकारणानांप्रयोजनंपश्यामः आविर्भावेचाविर्भावांतरक
ल्पनेनावस्थाप्रसंगः तस्मादाविर्भूतपटभावांतरएवक्रियतइतिरिक्तंवचः नअसदुत्पद्यतइत्रापिके
यमसदुत्पत्तिः सतीअसतीवा सतीचेत्किंतेनकारणेः असतीचेत्तत्रापुसंबंधइतिनवस्था अथव

119/1935

त्पत्तिः पटान्नार्थांतरमपितुपटएवासौ तथापियावदुक्तं भवतिपटइतितावदुक्तंभवत्युत्पद्यतइतिनत
त्पटइत्युक्तेउत्पद्यतेइतिनवाच्यं पौनरुक्त्यात्विनश्यतीतिनवाच्यंविरोधात् तस्मादियंपटोत्पत्तिः
स्वकारणसमवायोवास्वसत्तासमवायोवाउभयथापिनोत्पद्यते अथचतदर्थानिकारणानिव्यापार्यंते ए
वंसतएवपटादेराविर्भावायकारणापेक्षेसुपपन्नंम् नचपटरूपेणकारणानांसंबंधः तद्रूपस्याक्रिया
त्वात्क्रियासंबंधित्वाच्चकारणानांअन्यथाकारकत्वाभावात् तस्मात्सत्कार्यमितिपुष्कलं तदेवंप्रधा
नसाधनानुगुणंसत्कार्यमुपपाद्य यादृशंतत्प्रधानंसाधनीयंतादृशंमादर्शयितुं विवेकज्ञानोपयोगि
व्यक्तवैरूप्यमाह हेतुमदनित्यमव्यापिसक्रियमनेकमाश्रितंलिंगं सावयवंपरतंत्रंव्यक्तंविपरीत
मव्यक्तं व्यक्तंहेतुमत् हेतुःकारणंतद्वत् यस्यचयोहेतुःतदुपरिष्टाद्दर्शयति अनित्यंविनाशितिरोभ
वतीत्यर्थः अव्यापिसर्वंपरिणामिनव्याप्नोति कारणेहिनेकार्यमाविष्टंनकार्येणकारणं नचबुध्या
दयः प्रधानंवेविषयतीत्यव्यापकाः सक्रियंपरिस्पंदवत् यथाहिबुध्यादयउपात्तमुपात्तंदेहंत्यजंतिदे
हांतरंचोपादत्तेइतितेषांपरिस्पंदः शरीरपृथिव्यादीनांपरिस्पंदः प्रसिद्धएव अनेकंप्रतिपुरुषंबुध्या
दीनांभेदात् पृथिव्याद्यपिशरीरपटादिभेदेनानेकमेवआश्रितंस्वकारणाश्रितंबुध्यादिकार्यंअभे
देपिहिकथंचिद्भेदविवक्षयाआश्रयाश्रयिभावोपपद्यतइतिनवेतिलकाइत्युक्तम् लिंगंप्रधानस्य यथा
चेतंबुध्यादयः प्रधानस्यलिंगंतथाचोपरिष्टाद्दर्शयति प्रधानंत्वनप्रधानस्यलिंगंपुरुषस्यलिंगंभ
वेदितिभावः सावयवमवयववत् अवयवनमवयवोमिश्रणंसंयोगइतियावत् अप्राप्तिपूर्विका प्राप्तिः संयोगस्तेनसदृवर्त्ततइतिसावयवं तथाहिपृथिव्यादयः परस्परंसंयुज्यंतेएवमन्येपि

ननुप्रधानस्यबुध्यादिभिः संयोगः तादात्म्यात् नापिसत्वरजस्तमसांसंयोगःअग्रासेरभावात् प
रतंत्रंबुध्यादिस्वकार्य्येहंकारेजनयितव्येप्रकृत्यापूरमपेक्षतेअन्यथातुक्षीणासतीनाकृमहंकार
जनयितुमितिस्थितिः एवमहंकारादिभिरपिस्वकार्यजननेइतिसर्वंस्वकार्यजननेप्रकृत्यात्पू
रमपेक्षते तेनप्रकृतिंपरामपेक्षमाणंस्वकार्योपजननेपरतंत्रंव्यक्तं विपरीतमव्यक्तंअहेतुमत्
नित्यंव्यापिनिष्क्रियमपरिस्पंदियद्यपिअव्यक्तस्यास्तिपरिणामलक्षण्याक्रियातथापिपरिस्पं
दोनास्ति एकमनाश्रितमलिंगमनवयवंस्वतंत्रमव्यक्तं तदनेनप्रबंधेनव्यक्ताव्यक्तयोर्वैधर्म्य
मुक्तंसांप्रतितयोः साधर्म्येपुरुषाच्चवैधर्म्यमाह त्रिगुणमविवेकिविषयः सामान्यमचेतनंप्र
सवधर्मि व्यक्तंतथाप्रधानंतद्विपरीतस्तथाचपुमान् त्रयोगुणाः सुखदुःखमोहाअस्येतित्रि
गुणं तदनेनसुखादीनामात्मगुणत्वंपराभिमतमपाकृतम् अविवेकिचयद्याप्रधानंनस्वतोवि
विच्यते एवंमहदादयोपिनप्रधानादिविच्यंते तदात्मकत्वात् अथवासंभूयकारिताऽविवेकः
नकिंचिदेकंपर्याप्तंकार्य्यऽपितुसंभूय तत्रैनैकस्मात्कस्यचित् केनचित् संभवइति येवादुःवि
ज्ञानमेवहर्षविषादशब्दाद्याकारेनपुनरितोन्यत्तद्धर्मेतितान्प्रत्यार् विषयोग्राह्योविज्ञानाद्
द्विरितियावत् अतएवसामान्यंसाधारणंविज्ञानाकारत्वेतुअसाधारण्यादिज्ञानानांवृत्तिरूपा
णांतेऽप्यसाधारणाः स्युः तथाचनतंकीभूतानांगुणएकस्मिन्बहूनांप्रतिसंधानंयुक्तं अन्यथा
नस्यादितिभावः अचेतनंसर्वएवप्रधानबुध्यादयोऽचेतनाः ननुवैनाशिकवच्चैतन्यंबुद्धेरित्यर्थः

प्रसवधर्मि प्रसवधर्मेतिवक्तव्येमत्वर्थीयः प्रसवधर्मस्यनित्ययोगमाख्यातु सरूपविरूपपरि

णामाभ्यांनकदाचिदपिविघुज्यतइत्यर्थः व्यक्तवत्तमव्यक्तेतिदिशतियथाव्यक्तंतथाप्रधाने तथा
वैधर्म्यपुरुषस्याहतद्विपरीतस्तथाचपुमान् स्यादेतत् अहेतुमत्वनित्यत्वादि प्रधानसाधर्म्यम
स्तिपुरुषस्य एवमनेकत्वंव्यक्तसाधर्म्येतत्कथमुच्यतेनद्विपरीतः पुमानित्यतआह तथाचपुमानि
त्यवधारोप्यर्थः त्रिगुणमित्युक्तंतत्रकेतेत्रयोगुणाः किंचतदुपलक्षणमित्यतआह्प्रीत्यप्रीति
विषादात्मकाप्रकाशप्रवृत्तिनियमार्थाः अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्चगुणाः गुणा
इतिपरार्थाः सत्वंलघुप्रकाशकमित्यत्रचसत्वादयः क्रमणेनिर्द्दिश्यंते तदनागतावेक्षणेनतं
त्रयुक्त्यावाप्रीत्यादीनायथासंख्यंवेदितव्यं एतदुक्तंभवति प्रीतिः सुखंप्रीत्यात्मकंसत्वं गुणाः
अप्रीतिर्दुःखमप्रीत्यात्मकंरजोगुणः विषादोमोहोविषादात्मकंतमोगुणः येतुमन्यंते प्रीति
र्दुःखाभावान्नातिरिच्यते एवंदुःखमपिनप्रीत्यभावादन्यदिति तान्प्रत्यात्मग्रहणं नेतरेतरा
भावाः सुखादयोपितुभावाःआत्मशब्दस्यभाववचनत्वात् प्रीतिरात्माभावोयेषांतेप्रीत्यात्मानः
एवमन्यदपिव्याख्येयं भावरूपतांचेषामनुभवसिद्धा परस्पराभावात्मकत्वेतुपरस्पराश्रयापत्तेरेक
स्याप्यसिद्धेरुभयासिद्धिरितिभावः रूपमेषामुक्ताप्रयोजनमाह प्रकाशप्रवृत्तिनियमार्थाः अ
त्रापियथासंख्यमेवरजः प्रवर्त्तकतयासर्वत्रलघुसत्वं प्रवर्त्तयेत् यदितमसागुरुणाननियम्येतत
मोनियंतृतुकचिदेव प्रवर्तयतीतिभवतितमोपिनियमार्थं प्रयोजनमुक्ताक्रियामाह अन्योन्या
भिभवाश्रयजननमिथुनवृत्तयः वृत्तिः क्रिया साचप्रत्येकमभिसंबध्यते अन्योन्याभिभववृत्तयः ए
तेषामन्यतमेनार्थवशाद्धृतेनान्यतममभिभूयंते तथाहिसत्वंरजस्तमसी अभिभूयशांतामात्मनो

121/1935

दनिंप्रतिलभते एवंरजःसत्वतमसीअभिभूयघोरांएवंतमःसत्वरजसीअभिभूयमूछामितिअन्योन्या
श्रयदूषणयः यद्यप्याधाराधेयभावेननायमर्थोवर्तेतथापियदपेक्षयायस्यक्रियासतस्याश्रयः न
थाहिसत्वंप्रवृत्तिनियमावाश्रित्यरजस्तमसोः प्रकाशेनोपकरोति रजःप्रकाशनियमावाश्रित्स
प्रवृत्तेतरयोस्तमः प्रकाशाप्रवृत्तीआश्रित्यनियमेननरयोरिति अन्योन्यजननवृत्तयः अन्यतमम
न्यतमोजनयति जननंचपरिणामःसचगुणानांसदृशरूपः अतएवनहेतुमत्वं तत्वांतरस्यहेतो
रसंभवात् नाप्यनित्यत्वंतत्वांतरलयाभावात् अन्योन्यमिथुनवृत्तयः अन्योन्यस्यहृचराअविना
भाववर्तिनइतियावत् चसमुच्चये भवतिचात्रागमः अन्योन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनः र
जसोमिथुनंसत्वंसत्वस्यमिथुनंरजः तमसश्चापिमिथुनेतेसत्वरजसीउभे उभवोसत्वरजसोमि
थुनंतमउच्यते नैषामादिःसंप्रयोगोवियोगोनोपलभ्यतइति प्रकाशप्रवृत्तिनियमार्थाइत्युक्तं
तत्रकेतइत्यंभूताःकुतश्चैवंतआहुः सत्वंलघुप्रकाशकमिष्टमुपष्टंभकेवलंचरजः गुरुवरणक
मेवतमः प्रदीपवच्चार्थतोवृत्तिः सत्वमेवलघुप्रकाशकमिष्टंसंभव्याचार्य्यैः तत्रकायोगमनहेतुर्ध
र्मोलाघवम् गौरवप्रतिद्वंद्वयतोऽग्नेरूर्द्धज्वलनंभवति तदेवचलाघवंकस्यचिन्नियंक्यषनंहेतुर्य
थावायोः एवंकरणानांवृत्तिपटुत्वहेतुर्लाघवंगुरुत्वेहिमहान्तिस्युरिति सत्वस्यप्रकाशात्मकत्वमुक्तं
सत्वतमःसीस्वयमक्रियतयास्वकार्य्यप्रवृत्तिंप्रत्यवसीदतीरजसोवष्टंभेनेअवसादात् प्रच्याव्य
उत्साहंप्रयत्नेकार्य्यंते तदिदमुक्तमुपष्टंभकंरजइति कस्मादित्यतउक्तंचलमिति तदनेनरज
सः प्रवृत्यर्थत्वंदर्शितं रजस्तुचलनयापरितस्त्रैगुण्यंचालवद्गुरुणावष्टभ्नातमसातत्रतत्रप्रतिबं
धकेनकचिदेवप्रवर्त्तनइतितत्तस्तोव्याख्यातमोनियामकमुक्तंगुरुवरणतमेवतमइति एवकं

रः प्रत्येकंभिन्नक्रमःसंबध्यते सत्वमेवरजएवतमएव ननुचपरस्परविरोधिशीलागुणाःसंदोषसंदू
षत्वंपरस्परंध्वंसंतइत्येवयुक्तं प्रागेवत्वेषामेककार्याकारितेत्यतआह प्रदीपवच्चार्थतोवृत्तिः दृष्टमेवै
तद्यथावर्त्तितैलेअनलविरोधीनीअथचमिलितेसहानलेनरूपप्रकाशलक्षणंकार्य्यंकुरुतः यथा
चवातपित्तश्लेष्माणः परस्परविरोधिनः शरीरधारणलक्षणकार्यकारिणःएवंसत्वरजस्तमांसिमि
थोविरुद्धानपिअनुवर्त्ययंतिचस्वकार्यंकरिष्यंतिच अर्थतः पुरुषार्थतइति यथावक्ष्यति पुरुषार्थएं
वहेतुर्नकेनचित्कार्यतेकरणमिति अत्रचसुखदुःखमोहाः परस्परविरोधिनः स्वानुरूपाणिसुखदुः
खमोहात्मकान्येवनिमित्तानिकल्पयंति तेषांचपरस्परमभिभाव्याभिभावकभावज्ञानालंतद्यथाए
कंवस्त्रीरूपकुलशीलयौवनसंपन्नास्वामिनंसुखाकरोतितत्कस्यहेतोः स्वामिनंप्रतितस्याः सुखरूप
समुद्भवात् सैवस्त्रीसपत्नीदुःखाकरोतितत्कस्यहेतोः तांप्रतितस्यादुःखरूपसमुद्भवात् एवंपुरुषं
नरंतामविदमानंसैवमोहयति तंप्रतितस्यामोहरूपसमुद्भवात् अनयाचस्त्रियासर्वे भावाव्याख्याताः
तत्रयत्सुखहेतुस्तत्सुखात्मकंसत्वं यद्दुःखहेतुस्तद्दुःखात्मकंरजः यन्मोहहेतुस्तन्मोहात्मकंतमः सु
खप्रकाशलाघवानांत्वेकस्मिन्युगेयद्वृत्तावविरोधः सहदर्शनात् तस्मात्सुखदुःखमोहैरविवि
रोधिभिरविरोधिभिः सुखप्रकाशलाघवैर्ननिमित्तभेदाउन्नीयंते एवदुःखोपष्टंभकत्वप्रवर्त्तकत्वैर्
वंमोहगुरुत्ववरणत्वैरिति सिद्धंत्रैगुण्यमिति स्यादेतत् अनुभूयमानेषुपृथिव्यादिषुअनुभवसि
द्धाभवत्याविवेकादयः येपुनः सत्वादयोनानुभवपथमधिरोहंतितेषांकुतस्यमविवेकित्वेविषय
त्वेसामान्यत्वमचेतनत्वेप्रसवधर्मत्वंचेत्यतआह अविवेक्यादिः सिद्धःस्त्रैगुण्यान्नद्विपर्ययाभावात्

कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपिसिद्धं अविवेकित्वमविवेकियथाव्येकयोर्द्विवचनेकवचन
इत्यत्रत्रिवेकत्वयोरिति अन्यथाव्येकर्षिनिस्यात् कुतःपुनरविवेकित्वादि सिद्धिरित्यत आह त्रैगुण्या
त् यद्यत्सुखदुःखमोहात्मकंतदविवेक्यादियोगियथेदमनुभूयमानंव्यक्तमिति स्फुटत्वादन्वयेनो
क्तंव्यतिरेकमाह तद्विपर्ययाभावात् अविवेक्यादिविपर्ययेपुरुषेत्रैगुण्याभावात् अथवाव्यक्तावे
क्षेपक्षीकृत्यअन्वयाभावेनत्रैगुण्यादित्यवीतएवहेतुर्वक्तव्यः स्यादेतत् अव्यक्तसिद्धौसत्यांतस्या
विवेक्यादयोधर्माःसिध्यंतिअव्यक्तमेवत्वधापिनसिध्यतितत्कथमविवेक्यादिसिद्धिरित्यतआह
कारणगुणात्मकत्वात्कार्यस्याव्यक्तमपिसिद्धं अयमभिसंधिः कार्यंहिकारणगुणात्मकंदृष्टं यथा
तंतवादिगुणात्मकंपटादितथामहदादिरूक्षणेनापिकार्य्येणसुखदुःखमोहात्मनाभवितव्यं त
थाचतत्कारणंसुखदुःखमोहात्मकंप्रधानमव्यक्तंसिद्धं भवति स्यादेतत् व्यक्ताव्यतमुत्पद्यतेइतिक
णभक्षाक्षचरणननयाः परमाणवोहि व्यक्तास्तेर्व्यणुकादिक्रमेणपृथिव्यादिरूक्षणंकार्यंव्यक्त
मारभ्यते पृथिव्यादिपुचकारणगुणक्रमेणरूपाद्युत्पत्तिः तस्माव्यक्ताव्यक्तस्यतद्गुणस्यात्पत्तेः क
तमव्यक्तेनादृष्टचरणेत्यतआह भेदानांपरिणामात् समन्वयाच्छक्तितः प्रवृत्तेश्च कारणकार्यवि
भागादविभागाद्वैश्वरूप्यस्य भेदानांविशेषाणां महदादीनांभूतानांकारणंमूलकारणमव्यक्तं
कुतः कारणकार्यविभागात् विभागाद्वैश्वरूप्यस्य कारणेनसत्कार्यमितिहि स्थितं तद्यथाकू १२
र्मशरीरे संसेवांगानिनिश्चरंतिविभज्यंते उदंकूर्मशरीरएतान्येतस्यांगानि एवंनिविशमाना
नितस्मिन्नव्यक्तीभवंति एवंमृत्पिंडाद्धिपिंडाद्वाकार्याणिघटमुकुटादीनि संसेवाविभवंतिविभज्यंते संसेवचपृथिव्यादीनिकारणातन्मात्रादाविर्भवंतिविभज्यंते संसेवचतन्मात्राण्यहंकारा
त् संनेवचाहंकारः कारणान्महतः सन्नेवमहान् परमाव्यक्तादितिसोयंकारणात्परोव्यक्तात्
साक्षात्पारंपर्येणान्वितस्यकार्यस्यविभागः प्रतिसर्गेनुमृत्पिंडेहेमपिंडेवाघट मुकुटादयोवि
शंतेव्यक्तीभवंति तत्कारणरूपमेवानभिव्यक्तं कार्य्यरूपेणाभिव्यक्तंभवति एवंपृथिव्यादय
स्तन्मात्राणिविशंतेः स्वापेक्षयातन्मात्रमव्यक्तमेयंति एवंतन्मात्राण्यहंकारंविशंतिअहंकारम
व्यक्तमेयंति एवमहंकारोमहांतमाविशान् महांतमव्यक्तमेयंति महान्प्रकृतिंस्वकारणेविशति
प्रकृतेस्तुनकचिदावेशइतिसासर्वकार्याणामव्यक्तमेवसोयमविभागः प्रकृतेर्वैश्वरूप्यस्यना
नारूपस्यकार्य्यस्य स्वार्थिकः ष्यन तस्मात्कारणेकार्य्यस्यसतएवविभागाविभागाभ्यामव्यक्तंका
रणमस्तीति इतश्चाव्यक्तमस्तीत्याह शक्तितः प्रवृत्तेश्चकारणशक्तितः कार्यंप्रवर्तनइतिसिद्धं
असत्कारणात्कार्यस्यानुपपत्तेः शक्तिश्चकारणगतानकार्यस्याव्यक्तत्वादन्या नहिसत्कार्यप
क्षेकार्य्यस्यव्यक्तताया अन्यस्यांशक्तावस्तिप्रमाणंअयमेवहिसिकताभ्यस्तिलानांतैलोपादाना
नांभेदोयदेतेषवंतैलमस्यनागतावस्थेनसिकतास्वेवेति स्यादेतत् शक्तितः प्रवृत्तिः कार्यकार
णविभागाविभागोचमहतएवपरमाव्यक्तत्वंसाधयिष्यंतिकुतंततः परेणाव्यक्तेनेत्यतआहप
रिमाणात् परिमितत्वात् अव्यापित्वादितियावत् विवादाध्यासिताभेदाअव्यक्तकारणवंतः
परिमितत्वाद्घटादिवत् घटादयोहिपरिमितामृदाद्यव्यक्तकारणकादृष्टाः उक्तंमेतत् यथाका
र्य्यस्याव्यक्तावस्थाकारणमेवंति यन्महतः कारणंतत्परमाव्यक्तं ततःपरतराव्यक्तकल्पनायाप्र

माणाभावात् इतश्चविवादाध्यासिता भेदाअव्यक्तकारणवंतः समन्वयात् भिन्नानांसमानरूपतासस
न्वयः सुखदुःखमोहसमन्विताहि बुध्यादयोप्यध्यवसायादिलक्षणाः प्रतीयंते यानिचयद्रूपमनुगता
नितत्स्वभावाव्यक्तकारणकानि यथामृद्भेदेपिंडस्यमनुगतानिघटमुकुटादयोमृद्भेदेपिंडाव्यक्तकार.
णकाइति कारणमस्त्यव्यक्तं प्रवर्तंतेत्रिगुणतः समुदयाच्च परिणामतः सलिलवत् प्रतिगुणाश्रयविशे
षात् कारणमस्त्यव्यक्तं भेदानामितिसिद्धं अव्यक्तंसाधयित्वाऽस्य प्रवृत्तिप्रकारमाह प्रवर्तंतेत्रिगुण
तः प्रतिसर्गावस्थायांसत्वंचरजश्चतमश्चसदृशपरिणामानि भवंति परिणामेस्वभावाद्गुणानापरि
णम्यक्षणमप्यवतिष्ठंते तस्मात्सत्वंसत्वरूपतयारजोरजोरूपतयातमस्तमोरूपतयाप्रतिसर्गावस्था
यामपिप्रवर्तंतेतदिदमुक्तं त्रिगुणतइति प्रवृत्तेतरमाह समुदयाच्च समेसोदयः समुदयः समवायः स
मुदयश्चगुणानांनगुणप्रधानभावमंतरेण नचगुणप्रधानभावोवैषम्येविना नचवैषम्यमुपमर्दोपम
र्दकभावादृतइति मर्दादिभावेनप्रवृत्तिर्द्वितीया स्यादेतत् कथमेकरूपाणांगुणानामनेकरूपाप्रव
त्तिरित्यत आह परिणामतः सलिलवत् यथावारिदंविमुक्तं मुदकमेकरसमपितत्तद्भूमिविकारानु
साधनारिकेलतालतालीबिल्वचिरबिल्वामलककपित्थफलरसतयापरिणतमपिमधुराम्लतिक्त
कटुकषायतयाविकल्पते एवमेकैकसमुद्भवात् प्रधानंगुणमाश्रित्याप्रधानागुणाः परिणामभेदान्प्र
वर्तयंति तदिदमुक्तं प्रतिगुणाश्रयविशेषात् एकैकगुणाश्रयेणयोविशेषस्तस्मादित्यर्थः यतुंतो
ष्टिकाअव्यक्तंवाबुद्धिंवाअहंकारंवाइंद्रियाणिभूतानिवाआत्मानमभिमन्यमानास्तानेवोपासते
तान्प्रत्याह संघातपरार्थत्वात्त्रिगुणादिविपर्ययादधिष्ठानात् पुरुषोस्तिभोक्तृभावात् कैवल्यार्थंप्रव

125/1

तेश्च पुरुषोस्त्यव्यक्तादिव्यतिरिक्तः कुतः संघातपरार्थत्वात् अव्यक्तमहदहंकारप्रभृतयः परार्थाः सं
घातत्वात् शयनासनाभ्यंगवत् सुखदुःखमोहात्मकतयाव्यक्तादयःसर्वेसंघाताः स्यादेतत् शयनासना
दयः संघाताः सघातशरीराद्यर्थादृष्टानतु आत्मानंप्रतिपरार्थाः तस्मात्संघातांतरमेव परंगमयेयुर्नत्वसं
घातमात्मानमित्यतआह त्रिगुणादिविपर्ययात् अयमभिप्रायः संघातांतरार्थत्वेहितस्यापिसंघातत्वा
त्तेनापिसंघातांतरार्थेनभवितव्यमेवतेनेतिनव्यवस्थास्यात् नचव्यवस्थायांसत्यामव्यवस्थाकल्पना
युक्तागौरवप्रसंगात् नचप्रमाणत्वेनकल्पनागौरवमपिमृष्यतइतियुक्तम् संहतत्वस्यपरार्थ्यमा
त्रेणान्वयात् दृष्टांतदृष्टे सर्वे धर्मानुरोधेनत्वनुमानमिष्यतः सर्वानुमानोच्छेदप्रसंगइत्युपपादितंन्या
यवार्तिकतात्पर्यटीकायामस्माभिः तस्मादनवस्थाभिया अस्या संहतत्वमिष्यताअत्रिगुणत्वविवे
किित्वमविषयत्वमसमानात्वंचेतनत्वमप्रसवधर्मित्वंचाभ्युपेतव्यं त्रिगुणत्वादयोहि धर्माः संघातत्वे
नव्याप्ताः तत्वस्मिन्परेव्यावर्तमानंत्रिगुण्यादिव्यावर्तयंतिब्राह्मण्यमिवनिवर्त्तमानंक्षत्रत्वादिकं त
स्मादाचार्येणत्रिगुणत्वादिविपर्ययादितिवदतासंहतः परोविवक्षितः सचात्मेतिसिद्धं इतश्चपुरुषो
स्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत्सुखदुःखमोहात्मकंतत्सर्वंपरेणाधि
ष्ठीयमानंदृष्टं यथारथादियेनादिभिः सुखदुःखमोहात्मकंचेदंबुध्यादितस्मादेतदपिपरेणाधिष्ठात
व्यं सचपरः क्षेत्रिगुण्यादन्य आत्मेतिइतश्चास्तिपुरुषः भोक्तृभावात् भोक्तृभावेन भाग्यसुखदुःखेउप
लक्षयति भाग्यहिसुखदुःखे अनुकूलप्रतिकूलवेदनीयेप्रत्यात्ममनुभूयेति तेनानयोरनुकूलनी
येन प्रतिकूलनीयेनचकेनचिदपिअन्येन भवितव्यं नचानुकूलनीयाः प्रतिकूलनीयबुध्यादयः तेषां

सुखाद्यात्मकत्वेनस्वात्मनिवर्तनविरोधात् तस्माद्योसुखाद्यात्मानुकरणीयः प्रतिकूलनीयोवास-
चात्मेति अन्येत्वाहुः भोग्याद्दृश्याबुध्यादयः नचद्रष्टारमंतरेणदृश्यतायुक्तातेषां तस्मादस्तिद्रष्टा
दृश्यबुध्याद्यतिरिक्तः सचात्मेति भोक्तृभावात् द्रष्टृभावात् दृश्येनद्रष्टुरनुमानादित्यर्थः दृश्यत्वंचबु
ध्यादीनांसुखाद्यात्मकतयापृथिव्यादिवदनुमितमितिइतश्चास्तिपुरुषइत्याह कैवल्यार्थंप्रवृत्तेश्च
शास्त्राणामदृष्टार्थानांचदिव्यलोचनानांकैवल्यंचास्यैतिकदुःखत्रयप्रशमनलक्षणं कैवल्यंहिनबु
ध्यादीनांसंभवतीति नहिदुःखाद्यात्मकाः कथंस्वभावाद्वियोजयितुंशक्यंते तदतिरिक्तस्यदुःखा
दिरहितस्यत्वतदात्मनस्तोवियोगः शक्यसंपादः तस्मात्कैवल्यार्थंप्रवृत्तेरागमानांमहाधियांचा
स्तिबुध्याद्यतिरिक्त आत्मेतिसिद्धं तदेवंपुरुषास्तित्वं प्रतिपाद्यसकिं सर्वशरीरेष्वेकः किमनेकः प्र
तिक्षेत्रमितिसंशयेते प्रतिक्षेत्रमनेकतांप्रतिपादयन्तिजन्ममरणकरणानांप्रतिनियमादयुगप
त्सर्वेषांश्च सिद्धंपुरुषबहुत्वंत्रैगुण्यविपर्ययाच्चैवपुरुषबहुत्वंसिद्धंकस्मात् जन्ममरणकरणानां
प्रतिनियमात् जातिविशेषैः पूर्वाभिर्देहेंद्रियमनोहंकारबुद्धिवेदनाभिः पुरुषस्याभिसंब
धोजन्मन्यतुपुरुषस्यपरिणामस्तस्यापरिणामित्वात् तेषामेवचदेहादीनामुपात्तानांपरित्यागोम
रणं नत्वात्मनोविनाशस्तस्यकूटस्थनित्यत्वात् करणानिबुध्यादीनित्रयोदशतेषांजन्ममरणकर
णानांप्रतिनियमोव्यवस्थासाखल्वियंसर्वशरीरेष्वेकस्मिन्पुरुषेनोपपद्यते तदाखल्वेकस्मिन
जायमानेसर्वेजायेरन्म्रियमाणेचम्रियेरन् अंधादीचैकस्मिन्सर्वेएवांधादयःस्युः विचित्रंचैक
स्मिन्सर्वेएवविचित्राःस्युरित्यव्यवस्थाप्रतिक्षेत्रंपुरुषभेदंनुभवतिव्यवस्था नचैकस्यापिपुरु

१४

127/19

षस्यंदृष्टोपधानभेदाद्भवतिव्यवस्थाइतियुक्तं पाणिस्खनादिभेदेनजन्ममरणादिभेदप्रसंगात्
नहिपाणौव्रणेजातेवास्खनादौमहत्यवयवेयुक्तिर्जातामृतावाभवतीति इतश्चप्रतिक्षेत्रंपुरु
षभेदइत्याह अयुगपत्प्रवृत्तेश्च प्रवृत्तिः प्रयत्नलक्षणाययप्येतः करणवर्तिनीतथापिपुरुषेउप
चर्यंते तथाचस्मिंश्चैकत्रशरीरे प्रयतमानेसत्यन्यसर्वशरीरेष्वेकइतिसर्वत्रप्रयतेतततः सर्वाण्येव
शरीराणियुगपच्चेष्टेयुः नानात्वेतुनायंदोषइति इतश्चपुरुषभेदइत्याह त्रैगुण्यविपर्ययाच्चैवप्र
वक्ष्यामित्रक्रमः सिद्धमित्यस्यानंतरंद्रष्टव्यः सिद्धंभवनासिद्धंमत्रयोगुणास्त्रिगुण्यं तस्यविपर्ययो
न्यथात्वं केचित्खलुसत्वनिकायाः सत्वबहुलाः यथोर्ध्वस्रोतसः केचिद्रजोबहुलाः यथामनुष्याः
केचित्तमोबहुलायथातिर्य्यग्योनयः सोयमीदृशस्त्रैगुण्यविपर्ययोन्यथाभावस्तेषुतेषुसत्वनिका
येषुनभवेत यथैकःपुरुषः स्यात् भेदत्वयमदोषइति १८ एवंपुरुषबहुत्वेप्रसाध्यविवेकज्ञानो
पयोगिनंधातस्यधर्मानाह तस्माच्चविपर्य्यासासिद्धंसाक्षित्वमस्यपुरुषस्य कैवल्यंमाध्यस्थंद्रष्टृत्वम
कर्तृभावश्च तस्माच्चेतिचःपुरुषबहुत्वेनसहधर्मांतराणिसमुच्चिनोतिविपर्य्यासादित्युक्तेत्रैगुण्य
विपर्ययादित्यनंतरोक्तंसंबध्यतेअतस्सन्निरासायतस्मादित्युक्तं अनंतरोक्तंहि सन्निधानादिदमो
विषयःविप्रकृष्टंचनदृष्टंत्रिगुणमविवेक्यादिसंबध्यंते तस्मात्त्रिगुणादेर्योविपर्या
सःसपुरुषस्यत्रिगुणत्वेविवेकित्वमविषयत्वंसामान्यत्वंचेतनत्वंअप्रसवधर्मित्वं तत्रचेतनत्वेन
विषयत्वेनचसाक्षित्वद्रष्टृत्वदर्शितेन चेतनोहिद्रष्टाभवतिनाचेतनः साक्षीचदर्शितविषयोभवति
यस्मेदृश्यंतेविषयःससाक्षी यथालोकेऽर्थिप्रत्यर्थिनोर्विवादविषयेसाक्षिणोदर्शयतः एवंप्र

कृतिः स्वरचितेविषयेपुरुषायदर्शयतीतिपुरुषःसाक्षी नचाचेतनोविषयोवाशक्योविषयेदर्शयितुमि
तिचेतन्यादविषयत्वाच्चसाक्षी अतएवद्रष्टापिभवति अतश्चगुण्याच्चास्यकैवल्यमास्थेतिकोदुःखत्रया
भावःकैवल्यंतच्चतस्यस्वाभाविकमेव अतश्चगुण्यात्सुखदुःखमोहरहितत्वात्सिद्धं अतएवात्रैगुण्यान्
माध्यस्थंसुखादिहिसुखेतृप्यंनदुःखादिहिदुःखंद्विषन्नमध्यस्थोभवतिएतदुभयरहितस्तुमध्यस्थइस्तु
दासीनआख्यायतेविवेकित्वादप्रसवधर्मित्वाच्चाकर्तेतिसिद्धं १८ स्यादेतत् प्रमाणेनकर्तव्यमर्थम
वगम्यचेतनोहंचिकीर्षन्करोमीतिकृतिंचेतन्ययोः सामानाधिकरण्यमनुभवसिद्धंतदेतस्मिन्मतेना
वकल्पतेचेतनस्याकर्तृत्वात्कर्तुश्चाचेतन्यादिस्यतआह तस्मात्तत्संयोगादचेतनंचेतनावदिवलिंग
गुणकर्तृत्वेचतथाकर्तेवभवत्युदासीनः यतश्चैतन्यकर्तृलिंगिन्नाधिकरणेयुक्तितः सिद्धेतस्माद्धेति
रियमित्यर्थः लिंगंमहदादिसूक्ष्मपर्यंतंवक्ष्यतिभोक्तिबीजंतत्संयोगः सन्निधानमतिरोहितमन्यत
२० तस्मात्संयोगादित्युक्तंनचभिन्नयोः संयोगोपेक्षांविनानचेयमुपकार्योपकारकभावंविनात्मपेक्षा
हेतुमुपकारमाह पुरुषस्यदर्शनार्थंकैवल्यार्थंतथाप्रधानस्य पंङ्ग्वंधवदुभयोरपिसंयोगस्तत्कृतः
सर्गः प्रधानस्यैतिकर्मणिप्रवृत्तौ प्रधानस्यसर्वकारणस्ययद्दर्शनंपुरुषेणतदर्थं तदनेन प्रधानस्य
भोग्यतादर्शिता ततश्चभोग्ये प्रधानेभोक्तारमंतरेणनभवतिइतियुक्तास्यभोक्रपेक्षापुरुषस्यपे
क्षांदर्शयति पुरुषस्यकैवल्यार्थं तथाभोग्येनहिप्रधानेनसंभिन्नःपुरुषस्तद्रतंदुःखत्रयेस्वात्म
न्यभिमन्यमानःकैवल्यंप्रार्थयते तच्चसत्वपुरुषान्यताख्यातिनिबंधने नचसत्वपुरुषान्यताख्या
तिःप्रधानमंतरेणेतिकैवल्यार्थंपुरुषः प्रधानमपेक्षते अनादित्वाच्चसंयोगपरंपरायाभोगा

यसंयुक्तोपिकैवल्यायपुनःसंयुज्यतेइतियुक्तं ननुभवत्वनयोः संयोगोमहदादिसंयोगस्तुकुतस्त
इत्याह तत्कृतः सर्गः संयोगोहिमहदादिसर्गमंतरेणनभोगायनकैवल्यायचपर्याप्तइतिसंयो
गएवभोगापवर्गार्थंसर्गंकरोतीत्यर्थः २१ सर्गक्रममाह प्रकृतेर्महांस्ततोहंकारस्तस्माद्गणश्च
षोडशकः तस्मादपिषोडशकात्पंचभ्यः पंचभूतानि प्रकृतिरव्यक्तं महदहंकारोवक्ष्यमाण
लक्षणो एकादशेंद्रियाणिवक्ष्यमाणानि तन्मात्राणिच सोयंषोडशसंख्यापरिमितोगणःषो
डशकः तस्मादपिषोडशकात् अपकृष्टेभ्यः पंचभ्यस्तन्मात्रेभ्यः पंचभूतान्याकाशादीनि त
त्रशब्दतन्मात्रादाकाशंशब्दगुणं शब्दतन्मात्रसहितात्स्पर्शतन्मात्रात् वायुः शब्दस्पर्शगुणः
शब्दस्पर्शतन्मात्रसहिताद्रूपतन्मात्रात्तेजः शब्दस्पर्शरूपगुणं शब्दस्पर्शरूपतन्मात्रसहि
तात्रसतन्मात्रात् आपः शब्दस्पर्शरूपरसगुणाः शब्दस्पर्शरूपरसतन्मात्रसहितात् गं
धतन्मात्रात् शब्दस्पर्शरूपरसगंधगुणापृथिवी २२ अव्यक्तसामान्यतोलक्षितंतद्विपरी
तमित्यनेनविशेषतश्चसत्वंलघुप्रकाशकमित्यादिना व्यक्तमपिसामान्यतोलक्षितंहेतुम
दित्यादिनासंप्रतिविवेकज्ञानोपयोगितयाव्यक्तविशेषंबुद्धिंलक्षयति अध्यवसायोबुद्धिर्द्धर्मोज्ञानं
विरागैश्वर्यं सात्विकमेतद्रूपंतामसमस्माद्विपर्ययस्तं अध्यवसायइति क्रियाक्रियावतोरभेद विव
क्षया सर्वोव्यवहर्तृआलोच्यमत्वाद्मत्राधिकृतइति अभिमत्यकर्तव्यमेतन्मयेत्यध्यवस्यतिततश्च
प्रवर्तेतइतिसिद्धं तत्रयोयंकर्तव्यमितिविनिश्चयश्चित्तिसन्निधानादापन्नंचैतन्यायाः सोध्यवसायो
बुद्धेरसाधारणोव्यापारस्तदभेदाबुद्धिः सचबुद्धेर्लक्षणं समानासमानजातीयव्यवच्छेदकत्वात् तदे

वंबुधिलक्षयिलाविवेकज्ञानोपयोगिनस्यास्यधर्मान्सात्विकतामसानाह धर्मोज्ञानंविरागंऐश्व
र्य्यं सात्विकमेतद्रूपतामसमस्माद्विपर्यस्तं धर्मोभ्युदयनिःश्रेयसंहेतुः तत्रदानयामाद्यनुष्टा
नजनितधर्मोभ्युदयंहेतुःअष्टांगयोगाद्यनुष्ठानजनितश्चनिश्रेयसंहेतुः गुणपुरुषान्यताख्या
तिर्ज्ञानंविरागोरागाभावः तस्ययतमानसंज्ञा व्यतिरेकसंज्ञा एकेंद्रियसंज्ञा वशीकारसंज्ञाइ
तिचतस्रः संज्ञाः रागादयः कषायाश्चित्तवर्तिनस्तैरिंद्रियाणियथास्वविषयेषुप्रवर्त्यंते तन्मात्र
प्रवर्तितविषयेधिंद्रियाणीतितत्परिपाचनायारंभः प्रयत्नोयतमानसंज्ञा परिपाचनेच नुद्दीय
मानेकेचित्कषायाः पक्काः केचित्पक्ष्यंतेतत्रैवंपूर्वापरीभावेसतिपक्ष्यमाणेभ्यः कषायेभ्यःपक्का
नांव्यतिरेकेणावधारणंव्यतिरेकसंज्ञा इंद्रियप्रवृत्तसमर्थतयापक्कानामौत्सुक्यमात्रेणमनसि
व्यवस्थापनमेकेंद्रियसंज्ञा औत्सुक्यमात्रव्यापिनिवृत्तिरुपस्थितेषपिदृष्टानुश्रविकविषयेषुया
संज्ञात्रयात्सरागीनासावशीकारसंज्ञायामत्र भगवान् पतंजलिर्वर्णयांचकार दृष्टानुश्रविकविष
यवितृष्णास्यवशीकारसंज्ञावैराग्यमिति सोयंबुद्धिधर्मोवैराग्यमिति ऐश्वर्यमपिबुद्धिधर्मोयतो
णिमादिआदुर्भावः तत्राणिमाभवत्यणुः यतःशिरूामपिप्रविशति रूघिमालघुर्भवति यतःसू
र्यमरीचीनालंब्यसूर्यलोकंयाति महिमायतोमहान् भवति प्राप्तिरंगुल्यग्रेणचंद्रमसंस्पृशति
प्राकाम्यमिछानभिघातोयतोभूमावुन्मज्जति निमज्जतियथोदकेवशित्वंभूतभौतिकेवशीभव
त्यवश्य ईशित्वभूतभौतिकानांप्रभवव्यूह्यानामीष्टे यत्रकामावसायित्वंसत्यसंकल्पता यथा
स्य संकल्पोभवति भूतेषुतथाभूतानिभवंति अन्येषांनिश्चयानिश्चेतव्यमनुविधीयंते योगिन

स्तुनिश्चेतव्याःपदार्थानिश्चयमिति चत्वारःसात्विकाबुद्धिधर्माः तामसास्तुतद्विपरीताबुद्धिधर्माः
अधर्मोज्ञानंविरागंअनैश्वर्यमभिधानाश्चत्वारउत्यर्थः २३ अहंकारस्यलक्षणमाह अभिमानो
हंकारस्तस्माद्विविधः प्रवर्त्ततेसर्गः एकादशकश्चगणस्तन्मात्रपंचकश्चैव अहंकारोभिमानः
यत्वल्वालोचितंमनश्चतत्राहमधिकृतःशक्तःखल्वहमत्रमदर्थाएवामीविषयाःमतोनान्याधि
कृतःकश्चिदस्तिअतोअहमस्मीतियोभिमानःसाहंकारव्यापारत्वादहंकारःतमुपजीव्यहिबुद्धि
रध्यवस्यतिकर्त्तव्यमेतन्नमयेति तस्यकार्यभेदमाह तस्माद्विविधः प्रवर्त्ततेसर्गः प्रकारद्वयमा
ह एकादशकश्चगणइंद्रियाख्यः तन्मात्रपंचकश्चैव द्विविधएवसर्गोहंकारान्नान्यइति एवे
त्यनेनावधारयति २४ स्यादेतत् अहंकारादेकरूपात्कारणात्कथंजडः प्रकाशोगुणोविलक्ष
णोभवतइत्यत आह सात्विकएकादशकः प्रवर्त्ततेवैकृतादहंकारात् भूतादेस्तन्मात्रः सतामस
स्तज्जसादुभयं प्रकाशलाघवाभ्यांएकादशकइंद्रियगणः सात्विकोवैकृतात्सात्विकादहंका
रात् प्रवर्त्तते भूतादेस्त्वहंकारात्तामसात्तन्मात्रगणः प्रवर्त्तते कस्मात्पुनः एतदुक्तंभवति यद्यप्ये
कोहंकारस्तथापिगुणभेदाद्धवाभिभवाभ्यांभिन्नकार्यंकरोतीति ननुयदिसत्वतमोभ्यामेवस
र्वंकार्यंजन्यतेतदाकृतमकिंचित्करेणरजसेत्यत आह तेजसादुभयंभवति यद्यपिरजसोनका
र्यांतरमस्तितथापिसत्वतमसीस्वयमक्रियेसमर्थेअपिस्वकार्यंनकुरुतः रजस्तुचलतयानियदा
चालयतितदास्वकार्यंकुरुतइतिउभयस्मिन्नपिकार्यंसत्वतमसोःक्रियोत्पादनद्वारेणास्तिरजसः
कारणत्वंइतिनव्यर्थंरजइति २५ सात्विकमेकादशकमाख्यातुवात्यद्रियदशकंतावदाह बुद्धींद्रि

बंबुधिलक्षयित्वाविवेकज्ञानोपयोगिनस्यास्याधर्मान्सात्विकतामसानाह धर्मोज्ञानंविरागोऽएश्व
र्य्यं सात्विकमेतद्रूपंतामसमस्माद्विपर्यस्तं धर्मोभ्युदयनिःश्रेयसहेतुःतत्रदानयामाद्यनुष्ठा
नजनितधर्मोभ्युदयहेतुःअष्टांगयोगाद्यनुष्ठानजनितश्चनिश्रेयसहेतुः गुणपुरुषान्यताख्या
तिर्ज्ञानंविरागोरागाभावः तस्ययतमानसंज्ञा व्यतिरेकसंज्ञा एकेंद्रियसंज्ञा वशीकारसंज्ञाऽ
मित्रचतस्रः संज्ञाः रागादयः कषायाश्चित्तवर्तिनस्तेरिंद्रियाणियथास्वविषयेषु अवर्त्तंते तन्मात्र
प्रवर्तितविषयेद्विंद्रियाणीतितत्परिपाचनायारंभः प्रयत्नोयतमानसंज्ञा परिपाचनेच नुद्दीप्य
मानेकेचित्कषायाः पक्काः केचित्पक्ष्यंतेतत्रैवंपूर्वापरीभावेसतिपक्ष्यमाणेभ्यःकषायेभ्यःपक्का
नांव्यतिरेकेणावधारणंव्यतिरेकसंज्ञा इंद्रियप्रत्यस्तसमर्थतयापक्कानामौत्सुक्यमात्रेणमनसि
व्यवस्थापनंमेकेंद्रियसंज्ञा औत्सुक्यमात्रव्यापिनिवृत्तिरुपस्थितेष्वपिदृष्टानुश्रविकविषयेषुया
संज्ञात्रयात्सराचीनासावशीकारसंज्ञायामत्र भगवान् पतंजलिर्वर्णंयांचकार दृष्टानुश्रविकविष
यवितृष्णास्यवशीकारसंज्ञावैराग्यमिति सोयंबुद्धिधर्मोवैराग्यमिति ऐश्वर्यमपिबुद्धिधर्मोयतो
णिमादिप्रादुर्भावः तत्राणिमाभवत्यणुः यतःशिरुमपिप्रविशति रुघिमालघुर्भवति यतःसू
र्यमरीचीनालंब्यसूर्यलोकंयाति महिमायतोमहान् भवति प्राप्तिरंगुल्यग्रेणचंद्रमसंस्पृशति
प्राकाम्यमिछनभिद्यातोयतोभूमावुन्मज्जतिनिमज्जतियथोदकेवशित्वंभूतभौतिकंवशीभव
त्यवश्य ईशित्वभूतभौतिकानांप्रभवव्ययानामीष्टे यत्रकामावसायित्वंसत्यसंकल्पता यथा
स्यसंकल्पोभवति भूतेषुतथाभूतानिभवंति अन्येषांनिश्चयानिश्चेतव्यमनुविधीयंते योगिन

१६

131/193

स्तुनिश्चेतव्याःपदार्थानिश्चयमिति चत्वारःसात्विकाबुद्धिधर्माः तामसास्तुतद्विपरीताबुद्धिधर्माः
अधर्मज्ञानंवैराग्यंनैश्वर्यमभिधानाश्चत्वारइत्यर्थः २३ अहंकारस्यलक्षणमाह अभिमानो
हंकारस्तस्माद्विविधःप्रवर्त्ततेसर्गः एकादशकश्चगणस्तन्मात्रपंचकश्चैव अहंकारोभिमानः
यत्खल्वालोचितंमनंचतत्राहमधिकृतःशक्तःखल्वहमत्रमदर्थाएवामीविषयाःमतोनान्योधि
कृतःकश्चिदस्तिअतोऽहमस्मीतियोभिमानःसोहंकारव्यापारत्वादंकारःतमुपजीव्यहिबुद्धि
रध्यवस्यतिकर्त्तव्यमेतन्मयेति तस्यकार्यभेदमाह तस्माद्विविधःप्रवर्त्ततेसर्गः प्रकारद्वयमा
ह एकादशकश्चगणइंद्रियाख्यः तन्मात्रपंचकश्चैव द्विविधएवसर्गोहंकारान्नान्यइति एवं
स्यनेनावधारयति २४ स्यादेतत् अहंकारादेकस्मात्कथंजउ प्रकाशोगुणोविलक्ष
णोभवतइत्यतआह सात्विक एकादशकः प्रवर्त्ततेवैकृतादहंकारात् भूतादेस्तन्मात्रः सतामस
स्तैजसादुभयं प्रकाशलाघवाभ्यांएकादशकइंद्रियगणः सात्विकोविकृतात्सात्विकादहंका
रात् प्रवर्त्ततेभूतादेस्त्वहंकारात्तामसात्तन्मात्रगणः प्रवर्त्ततेकस्मात्यतः एतदुक्तंभवति यद्यप्ये
कोहंकारस्तथापिगुणभेदाद्भावाभिभवाभ्यांभिन्नकार्य्यंकरोतीति ननुयदिसत्वतमोभ्यांभवस
र्वकार्यजन्यतेतदाकृतमकिंचित्करेणरजसेत्यत आह तैजसादुभयंभवति यद्यपिरजसोनका
र्यांतरमस्तिनथापिसत्वतमसीस्वयमक्रियेसमर्थेअपिस्वकार्येनकुरुतः रजस्तुचलतयानेयदा
चालयतितदास्वकार्यंकुरुतइतिउभयस्मिन्नपिकार्यंसत्वतमसोःक्रियोत्पादनद्वारेणास्तिरजसः
कारणत्वंइतिनव्यर्थंरजइति २५ सात्विकमेकादशकमाख्यातुंवात्यद्रियदशकंतावदाह बुद्धींद्रि

याणिचक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि वाक्पाणिपादपायूपस्थान्यकर्मेंद्रियाण्याहुः सात्त्विकादहंका
रोपादानत्वमिंद्रियत्वे तच्चद्विविधं बुध्दींद्रियंकर्मेंद्रियंच उभयमप्येतदिंद्रस्यात्मनश्चिन्हत्वादिंद्रिय
मुच्यंते तानिचस्वसंज्ञाभिश्चक्षुरित्यादिभिरुक्तानि तत्ररूपग्रहणलिंगंचक्षुः शब्दग्रहणलिंगंश्रो
त्रं गंधग्रहणलिंगंघ्राणं रसग्रहणलिंगंरसने स्पर्शग्रहणलिंगंत्वक् वागादीनांवक्ष्यति २६ ए
कादशकमिंद्रियमाह उभयात्मकमत्र मनः संकल्पकमिंद्रियंचसाधर्म्यात् गुणपरिणामविशे
षानानात्वं वाक्यभेदाश्च एकादशस्विंद्रियेषुमध्येमनउभयात्मकंबुद्धींद्रियंकर्मेंद्रियंच चक्षुरा
दीनांवागादीनांचमनोधिष्ठितानांस्वविषयेषुप्रवृत्तेः तदसाधारणेनरूपेणलक्षयति संकल्यक
मिति आलोचितमिंद्रियेणवस्तुदृष्टमिति समुग्धमिदमेवंनैवमिति सम्यक्कल्पयति विशेषणवि
शेष्यभावेनविवेचयतीतियावत् यथाहुः समुग्धवस्तुमात्रंतुआग्गृह्णात्यविकल्पितं तत्सामान्य
विशेषशेषाभ्यांकल्पयंतिमनीषिणइति तथाआस्तित्वालोचनाज्ञानग्रथमंनिर्विकल्पकं बालमू
कादिविज्ञानसदृशंशुद्धवस्तुज्ञं ततः परं पुनर्वस्तुधर्मैर्ज्ञात्यादिभिर्यया बुध्यावसीयतेसापिप्रसक्ष
लेनसंमता सायंसंकल्यलक्षणोव्यापारोमनसः समानासमानजातीयव्यवच्छिन्नंमनोलक्षयति स्वा
दितत् असाधारणव्यापारयोगिनोयथामहदहंकारोनेंद्रियमेवंमनोप्यसाधारणव्यापारयोगिनें
द्रियं भवितुमर्हतीत्यतआह इंद्रियंच कुतः साधर्म्यात् इंद्रियांतरैः सात्विकाहंकारोपादानत्वंचसा
धर्म्येनलिंदलिंगत्वं संघातसत्वादीनामात्मलिंगत्वेनेंद्रियत्वप्रसंगात् तस्माद्व्युत्पत्तिमात्रमिंद्रलिं
गत्वंनतुप्रवृत्तिनिमित्तं अथकथंसात्विकाहंकारादेकस्मादेकादशेंद्रियाणीत्यतआह गुणपरि

णामविशेषान्नानात्वं शब्दाद्युपभोगसंवर्तकादृष्टसहकारिभेदात्कार्यभेदः अदृष्टभेदोपिगुणपरिणाम
एवबाह्यभेदाश्चेतिदृष्टांतार्थं यथाबाह्यभेदास्तथेदमर्थात्सर्वं तदेवमेकादशेंद्रियाणिस्वरूपतउत्कादशा
नामप्यसाधारणीर्वृत्तीराह शब्दादिषुपंचानामालोचनमात्रमिष्यतेवृत्तिः वचनादानविहरणोत्सर्गा
नंदाश्चपंचानां बुद्धींद्रियाणांसमुग्धंवस्तुदर्शनंचालोचनमुक्तं वचनादानविहरणोत्सर्गानंदाश्चपंचा
नांकर्मेंद्रियाणां कंठतालवादिस्थानमिंद्रियं वाक् तस्यावृत्तिर्वचनं स्पष्टमन्यत् अंतः करणत्रयस्य
वृत्तिमाह स्वालक्षण्यंवृत्तिस्त्रयस्यैषाभवत्यसामान्या सामान्यकरणवृत्तिः प्राणाद्यावायवः पंच
त्वमसाधारणंलक्षणं येषांतानिस्वलक्षणानि महदहंकारमनांसितेषांभावः स्वालक्षण्यं तच्चस्वानि
लक्षणान्येव तद्यथामहतोध्यवसायः अहंकारस्याभिमानः संकल्पोमनसोवृत्तिर्व्यापारवृत्तिर्द्वै
विध्यंसाधारणासाधारणत्वाभ्यामाह सैषाभवत्यसामान्याअसाधारणी सामान्यकरणवृत्तिः प्राणा
द्यावायवः पंच सामान्याचासौकरणवृत्तिश्चेति त्रयाणामपिकरणानांपंचवायवोवृत्तिः तद्भावेभा
वात्तदभावेअभावात् तत्र प्राणोनास्याग्रहन्नाभिपादांगुष्ठवृत्तिः अपानः लुकादिकापृष्टपार्श्वपा
दपायूपस्थवृत्तिः समानोहृन्नाभिसर्वसंधिवृत्तिः उदानोहृत्कंठतालुमूर्द्धभ्रूवृत्तिः व्यानस्त्वग्वृत्ति
रितिपंचवायवः २८ असाधारणीपुवृत्तिपुक्रमाक्रमोप्रकारावाह युगपच्चतुष्टयस्यतुवृत्तिः क्रम
शश्चतस्यनिर्दिष्टा दृष्टेतथाप्यदृष्टेत्रयस्यतत्पूर्विकावृत्तिः दृष्टेयदांधकारेविद्युत्संपातमात्राद्या
द्यमभिमुखमतिसन्निहितंपश्यति तदारभ्यास्यालोचनसंकल्पाभिमानाध्यवसायायुगपदेव
प्रादुर्भवंति यतस्ततउत्सुस्यतत्स्थानादेकपदेपसरंति क्रमशश्चयदाभेदमेदालोकेप्रथमंतावद्

स्तुमात्रेसमुग्धमालोचयति अथग्रणिहितमनाः कर्णौताळुष्टसशरसिंजिनीकमलीळुतदंडः अचे
उतरापाद्धरायमितिनिश्चिनोति अथमांग्रत्येतीत्यभिमन्यते अथाध्यवस्यतिअपसराम्यतःस्थाना
त् परोक्षेतुत्रयस्यब्राह्मेंद्रियवर्जेवृत्तिरित्याह् अदृष्टेत्रयस्यवत्पूर्विकावृत्तिःअंतः करणत्रयस्ययुग
पक्रमेणवावृत्तिर्दृष्टपूर्विकाइति अनुमानागमस्मृतयोहि परोक्षेर्थेदर्शनपूर्वांप्रवर्त्तेनान्यथा यथा
दृष्टेतथादृष्टेपीतियोजनीयं स्यादेतत् चतुर्णोत्रयाणांवावृत्तयोनतावन्मात्राधीनाः तेषांसदातनत्वेन
वृत्तीनांसदोत्पादप्रसंगात् आकस्मिकत्वेतुवृत्तिसंकरप्रसंगोनियमहेतोरभावादित्यत आह् स्वांस्वा
प्रतिपद्यंतेपरस्परासंकृतंहेतुकांवृत्तिं पुरुषार्थएवहेतुर्नकेनचित्कार्यतेकरणं करणानीतिशेषः य
थाहिवध्रवःपुरुषाःशक्तीकयाष्टीकधानुष्ककार्षापणिकाःकृतसंकेताःपरावस्कंदनायप्रवृत्तास्तत्रान्य
तमस्याकूतमवगम्यान्यतमः प्रवर्त्ततेप्रवर्त्तमानस्तुशाक्तीकःशक्तिमेवादत्तेननुयष्ट्यादिकं एवंयाष्टी
कोपियष्टिमेवनशक्त्यादिकं तथान्यतमस्यकरणस्याकूतात्स्वकार्यकरणाभिमुखादन्यतमंकरणंप्र
वर्त्ततेतत्प्रवृत्तेश्चहेतुमत्त्वान्नवृत्तिसंकरप्रसंइत्युक्तं स्वांस्वांप्रतिपद्यंतइति स्यादेतत् याष्टीकाद
यश्चेतनत्वात्परस्पराकूतमत्रगम्यप्रवर्त्तनइतियुक्तंकरणानिह्यचेतनानितस्मान्नैवप्रवर्त्तितुमुत्स
हेतेतेनेषामधिष्ठात्राकरणानांस्वरूपसामर्थ्योपयोगाभिज्ञेनभवितव्यमित्यतआह् पुरुषार्थएव
हेतुर्नकेनचित्कार्यतेकरणं भोगापवर्गलक्षणःपुरुषार्थएवानागतावस्थःप्रवर्त्तयति करणानि
कृतमत्रनत्स्वरूपाद्यभिज्ञेनवार्त्ता एतच्चवत्सविवृद्धिनिमित्तमित्यत्रोपपादयिष्यते नकेनचित्का
र्यतेकरणमित्युक्तंतत्रकरणंविभजते करणंत्रयोदशविधंतदाहरणधारणप्रकाशकरं कार्यंच

135/179

तस्यदशधाह्यार्यधार्यप्रकाश्यंच त्रयोदशेतिइंद्रियाण्येकादशबुद्धिरहंकारश्चेतित्रयोदशप्रका
रकंकरणं कारणविशेषःकरणं नचव्यापारावेशंविनाकारकत्वमितिव्यापारावेशमाह् तदाहरण
धारणप्रकाशकरं यथायथं तत्रकर्मेंद्रियाणिवागादीनिआहरंतियथास्वमुपाददतेस्वेव्यापारेण
व्यामुंचंतीतियावत्बुध्यहंकारमनांसिस्वहृत्साप्राणादिलक्षण्याधारयंति बुद्धींद्रियाणिप्रकाशयं
ति आहरणादिक्रियाणांसकर्मकतयाकिंकर्मकनिर्विधंचेत्सतआह् कार्यंचतस्येति तस्यत्रयोदश
विधस्यकरणस्यदशधाआह्यंधार्यंप्रकाश्यंच आह्यंव्याप्यंकर्मेंद्रियाणांवचनादानविहरणोत्स
र्गानंदाःयथास्वव्याप्याःतेचदिव्यादिव्यतयादशेत्याह्यंदशधा एवंधार्यमपिअंतःकरणत्रयस्यप्रा
णादिलक्षणयावृत्त्याशरीरंतच्चपार्थिवादिपांचभौतिकंशब्दादीनांपंचानांसमूहःपृथिवीति तेच
पंचदिव्यादिव्यतयादशेति धार्यमपिदशधा एवंबुद्धींद्रियाणांप्रकाश्यमपिदशधेति त्रयोदश
विधेकरणेवांतरविभागंकरोति॥ ॥अंतःकरणंत्रिविधंदशधाबाह्यंत्रयस्यविषयारव्यं॥सांप्र
तकालंबाह्यंत्रिकालंसाभ्यंतरंकरणं॥त्रिविधमितिबुद्धिरहंकारोमनइतिशरीराभ्यंतरवर्त्तित्वा
दंतःकरणं। दशधाबाह्यमिंद्रियं। त्रयस्यांतःकरणस्यविषयारव्यंविषयमाख्यातीतिविषयारव्यं। वि
षयनिश्चयमिमानाध्यवसायेषुकर्त्तव्येषुहारीभवति। तत्रबुद्धींद्रियाण्यालोचनेन। कर्मेंद्रियाणितुस्व
व्यापारेण। बाह्याभ्यंतरयोःकरणयोर्विशेषांतरमाह्। सांप्रतकालंबाह्यंत्रिकालंसाभ्यंतरंकरणं।सां
प्रतकालोवर्त्तमानकालः। बाह्यमिंद्रियं। वर्तमानसमीपमनागतमपिवर्तमाने।अतीतोवागापिवर्तमा
नकालविषयाभवति। त्रिकालंसाभ्यंतरंकरणंतद्यथा। नदीपूरभेदादभ्रदृष्टिः। अस्निग्धमादग्नि

रिहननगानिकुंजे।असत्युपघातकोपिपीलिकाकांउसंचाराद्रविष्यतिवृष्टिरितिं।तदनुरूपाःसंकल्पाभि
मानाध्यवसायाश्चभवंति।कालश्चनंवैशेषिकाभिमतएकोऽनागतादिव्यवहारभेदंप्रवर्तियितु
महतीति।तस्मादयंयेरुणधिभेदेरनागतादिभेदंप्रतिपद्यतेसंतुतएवोपाधयोऽनागतादिव्यवहा
रहेतवःकृतमत्रांतर्गडुनाकालेनेतिसांख्याचार्याः।तस्मान्नकालरूपतत्वांतराभ्युपगमइति।सांप्र
तंकालानांब्राह्मेंद्रियाणांविषयेविवेचयति॥ ॥बुद्धींद्रियाणितेषांपंचविशेषाविशेषविषयायाणि
वाग्भवतिशब्दविषयाशेषाणितुपंचविषयाणि॥ ॥तेषांदशानामिंद्रियाणांमध्येपंचविशेषावि
शेषविषयाणि।विशेषाःस्थूलाःशब्दादयःशांतघोरमूढाःपृथिव्यादिरूपाःअविशेषास्तन्मात्रा
णिसूक्ष्माशब्दादयःमात्रयाग्रहणेनस्थूलभावमपाकरोति।विशेषाश्चाविशेषाश्चविशेषाविशेषाःत
त्रचविषयायेषांबुद्धींद्रियाणांतानितथोक्तानि।तत्रोर्ध्वस्रोतसांयोगिनांचश्रोत्रंशब्दतन्मात्रविष
यंस्थूलशब्दविषयंच।अस्मदादीनांतुस्थूलशब्दविषयमेव।एवंतेषांत्वक्स्थूलसूक्ष्मस्पर्शविष
या।अस्मदादीनांतुस्थूलस्पर्शविषयंयेव।एवंचक्षुरादयोपितेषामस्मदादीनांचरूपादियुस्थूलसूक्ष्म
पुदृष्टव्याः।एवंकर्मेंद्रियेषुमध्येवाग्भवतिशब्दविषयास्थूलशब्दविषयातद्धेतुत्वात्।नतुशब्दतन्मा
त्रस्यहेतुःतस्यादंकारहेतुत्वेनवागिंद्रियेणसहैककारणत्वात्॥ शेषाणिचत्वारिपाणिपादपायू
पस्थाख्यानिपंचविषायाणि।पाण्याद्याहार्याणांघटादीनांपंचशब्दोद्यात्मकत्वादिति।सांप्रतंतत्रदश
दशसुकरणेषुकेषांचिद्गुणभावसंद्दतुकमाह॥ ॥सांतःकरणाबुद्धिःसर्वविषयमवगाहतेयस्मा
त्।तस्मात्त्रिविधंकरणंद्वारिद्वाराणिशेषाणि॥ ॥द्वारिप्रधानं।शेषाणिकरणानिबाह्यानिद्वाराणि

137/19

तेरुपनीतंसमनोहंकारबुद्धिर्यस्मात्सर्वविषयमवगाहतेअध्यवस्यतितस्माद्बाह्येंद्रियाणिद्वारा
णिद्वारवतीचसांतःकरणाबुद्धिरिति।नकेवलंबाह्यानींद्रियाण्यपेक्ष्यप्रधानंबुद्धिःआपितुयेअ
पिअहंकारमनसीद्वारिणीतेअपेक्ष्यबुद्धिःप्रधानमित्याह॥ ॥एतेप्रदीपकल्पाःपरस्परविलक्षणा
गुणविशेषाः।कृत्स्नंपुरुषस्यार्थंप्रकाश्यबुद्धेःप्रयच्छंति॥ ॥यथाहिग्रामाध्यक्षःकुटुंबिकेभ्यःक
रमादत्स्वविषयाध्यक्षायप्रयच्छतिविषयाध्यक्षश्चसर्वाध्यक्षाय।सचभूपतये।तथाबाह्येंद्रियाण्
यालोच्यमनसेसमर्पयंति।मनसश्चसंकल्पाहंकारायाअहंकारश्चाभिमत्यबुद्धेसर्वाध्यक्षभूता
यां।तदिदमुक्तंप्रकाश्यबुद्धेःप्रयच्छंतीति।बाह्येंद्रियमनोहंकाराश्चगुणविशेषाःगुणानांसत्व
रजस्तमसांविकारास्तेतुपरस्परविरुद्धधर्माणोपिपुरुषार्थत्वेनभोगरूपेणैकवाक्यतांनीताःय
थांतेऽवर्तिवर्तयःसंतमसापनयेनरूपप्रकाशायमिलिताःप्रदीपःएवमेतेगुणविशेषाःइतियो
जना।कस्मात्पुनर्बुद्धेःप्रयच्छंतिनतुबुद्धिरहंकारायद्वारिणेमनसेवेत्यतआह।सर्वप्रत्युपभोगं
यस्मात्पुरुषस्यसाधयतिबुद्धिः।सेवचविशिनष्टिपुनःप्रधानपुरुषांतरंसूक्ष्मं॥ ॥पुरुषार्थस्यप्र
योजकत्वान्तस्ययत्साक्षात्साधनंतत्प्रधानं।बुद्धिश्चास्यसाक्षात्साधनंतस्मात्सैवप्रधानं।यथा
सर्वाध्यक्षःसाक्षाद्राज्यार्थसाधनत्वात्प्रधानं।इतरेतुग्रामाध्यक्षादयस्तंप्रतिगुणभूताः।बुद्धि
र्हिपुरुषसन्निधानात्तछायायत्सातद्रूपेचसर्वविषयोपभोगंयस्मात्पुरुषस्यसाधयति।सुखदुः
खानुभवादिर्भोगःसचबुद्धेबुद्धिश्चपुरुषरूपेतिसापुरुषमुपभोजयति।यथार्थालोचनसंक
ल्पाभिमानाश्चतत्तद्रूपपरिणामेनबुद्धावुपसंक्रांताः।इंद्रियादिव्यापाराअपिबुद्धेरेवस्वरूपा

पोरणाध्यवसायेनसंदंशकव्यापारा भवंति। यथासंदंशेनसहया माध्यक्षादिसेन्येसर्वाध्यक्षस्यभव
ति। सर्वंशब्दादिकंप्रतियउपभागःपुरुषस्यतंसाधयति। ननुपुरुषस्यसर्वविषयोपरागसंपादिका
यदिपुद्धिस्तर्ह्यनिर्मोक्षइत्यतआह। सेयंति। पश्चात्प्रधानपुरुषयोरंतरंविशेषंविज्ञानस्थिकरोति
यथोदनिकःओदनपाकंपचतीति। ननुप्रधानपुरुषयोर्दंतरस्यकृतकत्वादनित्यत्वंतत्कृतमोक्ष
स्यापीत्यतआह। विज्ञानस्थिप्रधानंसविकारमन्यदहमन्यइति विद्यमानमेवांतरमविवेकेनबु
द्धिर्बोधयतिनतुतत्करोतियेनानित्यत्वमित्यर्थः। करणंचप्रतिपादने। अनेनापवर्गःपुरुषार्थोदर्शितः। सूक्ष्ममतिदुर्लक्ष्यमंतरमिति। तदेवंकरणानिविभज्यविशेषाऽविशेषान्विभजंते॥ ॥
तन्मात्राण्यविशेषास्तेभ्योभूतानिपंचपंचभ्यः। एतस्मृताविशेषाःशांताघोराश्चमूढाश्च॥॥शब्दादि
तन्मात्राणिसूक्ष्माणि। नचैषांशांतादिरस्त्युपभोगयोग्योविशेषइतिमात्रशब्दार्थः। अविशेषानु
त्कांविशेषान्वक्तुमुत्पत्तिमेषामाह। तेभ्यस्तन्मात्रेभ्यःयथासंख्यमेकद्वित्रिचतुःपंचभ्योभूतानि। आ
काशानिलानलसलिलावनिरूपाणिपंच। पंचभ्यस्तन्मात्रेभ्यः। अस्त्वेषांभूतानामुत्पत्तिर्विशेषकि
मायातमित्यतआह। एतस्मृताविशेषाः। कुतःशांताद्याराश्चमूढाश्च। चःएकोहेतौ। द्वितीयःसमुच्चये। यस्मादाकाशादिषुस्थूलेपुसत्वप्रधानतयाकेचिच्छांताःसुखाःप्रसन्नालघवः। केचिद्रजःप्रधान
तयाघोरादुःखाअनवस्थिताः। केचित्तमःप्रधानतयामूढाविषंणागुरवः। तेअमीपरस्परव्यावृत्ताअ
नुभयमानाविशेषास्थूलाइतिचोच्यंते। तन्मात्राणितुअस्मदादिभिःपरस्परव्यावृत्तानिनानुभूयंत
इतिअविशेषाःसूक्ष्माइतिचोच्यंते। विशेषाणामवांतरविशेषमाह। सूक्ष्मामातापितृजाःसहप्रभू

139/1935

तेस्त्रिधाविशेषाःस्युः। सूक्ष्मास्तेषांनियतामातापितृजानिवर्तंते॥ ॥त्रिधाविशेषाःस्युः। त्रीन्विशेष
प्रकारानाह। सूक्ष्माःसूक्ष्मदर्शाःमातापितृजाःषाट्कौषिकाःतत्रमातृतोलोमकेशदितमांसानिपि
तृतस्नुस्नायुस्थिमज्जानइतिषट्कोषाःप्रकृष्टानिभूतानिप्रभूतानिमहांतितेःसह। सूक्ष्मशरीरमे
कोविशेषःमातापितृजंद्वितीयः। महाभूतानितृतीयः। महाभूतेचबटघटादीनांनिवेशइति। सूक्ष्म
मातापितृजयोर्दर्शयाविशेषमाह। सूक्ष्मास्तेषांविशेषाणांमध्ययेतेनियताः। मातापितृजाःनिव
र्तंते। रसांतावा। मस्तांतावा। विडंतावेति। सूक्ष्मशरीरंविभजंते॥ ॥पूर्वोत्पन्नमसक्तंनियतंमहदा
दिसूक्ष्मपर्यंतं। संसरतिनिरुपभोगंभावैरधिवासितंलिंगं॥ ॥पूर्वोत्पन्नंप्रधानेनादिसर्गेप्रति
पुरुषमेकैकमुत्पादितं। असक्तमव्याहतंशिलास्तंभमप्यनुप्रविशति। नियतं। आचादिसर्गादोचमहा
प्रलयादवतिष्ठते। महदादिसूक्ष्मपर्यंतंमहदहंकारकादशेंद्रियपंचतन्मात्रपर्यंतं। एषांसमुदा
यःसूक्ष्मशरीरं। शांतघोरमूढैरिंद्रियैरानुवितत्वाद्विशेषः। नन्वेतदेवास्तुशरीरं भोगायतनस्य
पुरुषस्यकृतंदृश्यमानेनषाट्कौषिकेनशरीरेणतत्राह। संसरति। उपात्तमुपात्तंषाट्कौषिकशरी
रंजहातिहायहायंचोपादत्ते। कस्मान्निरुपभोगंयतःषाट्कौषिकशरीरं विनासूक्ष्मशरीरंनि
रुपभोगंयस्मात्तस्मात्सूक्ष्मशरीरंसंसरति। ननुधर्माधर्मनिमितःसंसारःनतुसूक्ष्मशरीरस्यासि
द्धयोगस्तत्कथंसंसरतीत्यतआह। भावैरधिवासितं। धर्माधर्मज्ञानाज्ञानवैराग्यैश्वर्यानैश्वर्याणि
भावास्तदन्विताबुद्धिस्तदन्वितंचसूक्ष्मशरीरमिति। तदपिभावैरधिवासितं। यथासुरभिचंपकसं
पर्कादूस्नेतदामोदवासितं भवतितस्माद्भावैरधिवासितत्वात्संसरति। कस्मात्पुनःप्रधानमिवमहा

पोरणाध्यवसायेनसंदंशकव्यापाराभवंति। यथासंदंशेनसहग्राभाध्यक्षादिसेन्येसर्वाध्यक्षस्यभवंति। सर्वशब्दादिकेप्रतियूपभागःपुरुषस्यतेसाधयति। ननुपुरुषस्यसर्वविषयोपरागसंपादिकायदिबुद्धिस्तर्ह्यनिर्मोक्षइत्यतआह। सेयंति। पश्चात्प्रधानपुरुषयोरंतरंविशेषंविज्ञानंष्टिकरोतियथोदनिकःओदनपाकंपचतीति। ननुप्रधानपुरुषयोरंतरस्यकृतकत्वादनित्यत्वंतत्कृतमोक्षस्यापीत्यतआह। विज्ञानंष्टिप्रधानंसविकारमन्यदहमन्यइतिविद्यमानमेवांतरमविवेकेनबुद्धिर्बोधयतिनतुतत्कारोतियेनानित्यत्वमित्यर्थः। करणंचप्रतिपादनं। अनेनापवर्गःपुरुषार्थोदर्शितः। सूक्ष्ममतिदुर्लक्ष्यमंतरमिति। तदेवंकरणानिविभज्यविशेषाऽविशेषान्विभजंते॥ ॥
तन्मात्राण्यविशेषास्तेभ्योभूतानिपंचपंचभ्यः। एतेस्मृताविशेषाःशांताघोराश्चमूढाश्च॥॥शब्दादितन्मात्राणिसूक्ष्माणि। नचैषांशांतादिरस्त्युपभोगयोग्योविशेषइतिमात्रशब्दार्थः। अविशेषानुत्कांविशेषान्वक्तुमुत्पत्तिमेषामाह। तेभ्यस्तन्मात्रेभ्यःयथासंख्यमेकद्वित्रिचतुःपंचभ्योभूतानि। आकाशानिरुक्तानि सलिलावनिरुपाणिपंच। पंचभ्यस्तन्मात्रेभ्यः। अस्त्वेषांभूतानामुत्पत्तिर्विशेषेकिमायातमित्यतआह। एतेस्मृताविशेषाः। कुतःशांताद्याश्चमूढाश्च। चःएकोहेतौ। द्वितीयःसमुच्चये। यस्मादाकाशादिषुस्थूलेषुसत्वप्रधानतयाकेचिच्छांताःसुखवःप्रसन्नलघवः। केचिद्रजःप्रधानतयाघोराःदुःखाअनवस्थिताः। केचित्तमःप्रधानतयामूढाविषण्णागुरवः। तेअमीपरस्परव्यावृत्ताअनुभयमानाविशेषास्थूलाइतिचोच्यंते। तन्मात्राणितुअस्मदादिभिःपरस्परव्यावृत्तानिनानुभूयंतइतिअविशेषाःसूक्ष्माइतिचोच्यंते। विशेषाणामवांतरविशेषमाह। सूक्ष्मामातापितृजाःसहयभू

तेस्त्रिधाविशेषाःस्युः। सूक्ष्मास्तेषांनियतामातापितृजानिवर्तंते॥ ॥त्रिधाविशेषाःस्युः। त्रीन्विशेषप्रकारानाह। सूक्ष्माःसूक्ष्मदर्शाःमातापितृजाःषाट्कौषिकाःतत्रमातृतोलोमलोहितमांसानिपितृतस्नुस्नायुस्थिमज्जानइतिषट्कोशाःप्रभूतानिभूतानिप्रभूतानिमहांतितेःसह। सूक्ष्मशरीरमेकोविशेषःमातापितृजोद्वितीयः। महाभूतानितृतीयः। महाभूतेचबदरघटादीनांनिवेशइति। सूक्ष्ममातापितृजयोर्दृश्यादृश्यविशेषमाह। सूक्ष्मास्तेषांविशेषाणांमध्येयेतेनियताः। मातापितृजाःनिवर्तंते। रसांतावा। मस्मांतावा। विउंतावेति। सूक्ष्मशरीरंविभजंते॥ ॥पूर्वोत्पन्नमसक्तंनियतंमहदादिसूक्ष्मपर्यंतं। संसरतिनिरुपभोगंभावैरधिवासितंलिंगं॥ ॥पूर्वोत्पन्नंप्रधानेनादिसर्गेप्रतिपुरुषमेकैकमुत्पादितं। असक्तमव्याहतंशिलाम्प्यनुप्रविशति। नियतं। आचादिसर्गादाचमहदाद्यनुयादवतिष्ठते। महदादिसूक्ष्मपर्यंतंमहदहंकारादशेंद्रियपंचतन्मात्रपर्यंतं। एषांसमुदायःसूक्ष्मशरीरं। शांतघोरमूढैरिंद्रियैरानवित्वाद्विशेषः। नन्वेतदेवास्तुशरीरंभोगायतनंसत्पुरुषस्यकुतेदृश्यमाननषाट्कौषिकनशरीरंणतत्राह। संसरति। उपात्तमुपात्तंषाट्कौषिकशरीरंजहातिहायहायंचोपादत्ते। कस्मात्तनिरुपभोगंयतःषाट्कौषिकशरीरंविनासूक्ष्मशरीरंनिरुपभोगंयस्मात्तस्मात्सूक्ष्मशरीरंसंसरति। ननुधर्माधर्मनिमितःसंसारःनतुसूक्ष्मशरीरस्यासितद्योगस्तत्कथंसंसरतीत्यतआह। भावैरधिवासितं। धर्माधर्मज्ञानाज्ञानवैराग्यैश्वर्यानैश्वर्याणिभावास्तदन्विताबुद्धिस्तदन्वितंचसूक्ष्मशरीरमिति। तदपिभावैरधिवासितं। यथासुरभिचंपकसंपर्कादूस्त्रंतदामोदवासितंभवतितस्माद्भावैरधिवासितत्वात्संसरति। कस्मात्पुनःप्रधानमिवमहा

अलयेषितशरीरंनतिष्ठतीत्यतआह।लिंगंलयंगच्छतीतिलिंगं। हेतुमत्वेनचास्यलिंगत्वमितिभावः।
स्यादेतत्। बुद्धिरेवसाहंकारेंद्रियाकस्मान्नसंसरतिकृतंसूक्ष्मशरीरेणाश्रमणिकेनेत्यतआह॥ ॥
चित्रंयथाश्रयमृतेस्थाण्वादिभ्योविनायथाछाया। तद्वद्विनाविशेषैर्नतिष्ठतिनिराश्रयंलिंगं॥ ॥लिं
गनात्तज्ञापनात्बुध्यादयोलिंगंतदाश्रयंननिष्ठति। जन्मप्रयाणांतरालेबुध्यादयः प्रसुप्तशरी
राश्रयाः प्रसुप्तपंचतन्मात्रवत्संसतिबुध्यादित्वात्। दृश्यमानशरीराश्रयबुध्यादिवत्। विनाविशे
षैरिति। सूक्ष्मैः शरीरैरित्यर्थः। आगमश्चात्र भवति। अंगुष्टमात्रपुरुषंनिश्चकर्षयमोबलादिति।
अंगुष्टमात्रत्वेनसूक्ष्मतामुपलक्षयति। आत्मनोनिष्कर्षासंभवात्सूक्ष्ममेवशरीरंपुरुषः तदपिहि
पुरिस्थूलशरीरंशेतइति। एवंसूक्ष्मशरीरासिद्धत्वमुपपाद्ययथासंसरतियेनहेतुनातदुभयमाह॥ ॥
पुरुषार्थहेतुकमिदंनिमित्तंनैमित्तिकप्रसंगेन। प्रकृतेर्विभुत्वयोगान्नटवद्व्यवतिष्ठतेलिंगं। पुरुषा
र्थेनहेतुनाप्रयुक्तंनिमित्तंधर्मादिनैमित्तिकंतेषुतेषुनिकायेषुषाड्कौषिकंशरीरपरिग्रहः सर्ग
धर्मादिनिमित्तप्रभवः। निमित्तंचनैमित्तिकंचतत्त्रयः प्रसंगः प्रसक्तिः तयानटवद्व्यवतिष्ठतेलिंगं
सूक्ष्मशरीरं। यथाहिनटस्नाते। भूमिकांविधायरामोवाजातशत्रुर्वावत्सराजोवा भवतिएवंननस्थूल
शरीरपरिग्रहेणदेवोवा मनुष्योवापशुर्वा भवतिवनस्पतिर्वासूक्ष्मशरीरमित्यर्थः। कुतस्यः पुनरस्य
दृश्यामहिमेत्यतआह। प्रकृतेर्विभुत्वयोगात्। तथाचपुराणे विश्वरूप्यास्थानस्यपरिणामोयम
द्भुतइति। निमित्तंनैमित्तिकप्रसंगेनत्युक्तंतत्रनिमित्तंनैमित्तिकंचविभजते॥ ॥सांसिध्यिश्चकाभा
वाः प्राकृतिकावैकृतिकाश्च। धर्माद्याः दृष्टाः करणाश्रयिणः कायाश्रयिणश्चकललाद्याः सांसिद्धि

काभावाः करणाश्रयिणोनिमित्तं। कायाश्रयिणः श्चकलकलाद्यावैकृतानैमित्तिकाः। प्राकृतिकाः स्वा
भाविकाभावाः सांसिद्धिकाश्च। तथाहि। सर्गादावादिविद्वानत्र भवान्कपिलोमहामुनिधर्मज्ञानवै
राग्यैश्वर्यसंपन्नः प्रादुर्भूवेति स्मरंति। वैकृताश्च भावाः असांसिद्धिकाउपायानुष्ठानोत्पन्नाः यथा
प्राचेतसप्रभृतीनामरूपिणां। एवमधर्माज्ञानावैराग्यानैश्वर्योण्यपि। कार्ये शरीरे। तदाश्रयिणः
तस्यावस्थाः कलकलबुद्बुदमांसपेशीकरंडकांगप्रत्यंगव्यूहगर्भस्थस्य। ततोनिर्गतस्यबाल्यकौमार
यौवनवार्धकानीति। अवगतानिमित्तंनैमित्तिकानि। कतमस्यतुनिमित्तस्यकतमंनैमित्तिकमित्यत
आह॥ ॥धर्मेणगमनमूर्ध्वंगमनमधस्ताद्भवत्यधर्मेण। ज्ञानेनचापवर्गोविपर्ययादिष्यतेबंधः॥ ॥ध
र्मेणगमनमूर्ध्वं सुप्रभृतिलोकेषु। गमनमधस्ताद्भवत्यधर्मेण। सुतलादिषु। ज्ञानेनचापवर्गः। तावदे
वप्रकृतिरास्तेभोगनयावद्विवेकख्यातिंकरोति। अथविवेकख्यातौसत्यांकृतकृत्यतयाविवेकख्या
तिमंतंपुरुषंप्रतिनिवर्तते। यथाहुः विवेकख्यातिपर्यंतंहिप्रकृतिर्वेष्टितमिति। विपर्ययाद्तत्वज्ञाना
दिष्यतेबंधः। सचत्रिविधः। प्राकृतिकोवैकारिकोदाक्षिणश्चेति। तत्रप्रकृतावात्मज्ञानान्येप्रकृति
मुपासते। तेषांप्राकृतिकोबंधः। योबंधः पुराणेप्रकृतिरूयान् प्रत्युच्यते। पूर्णेशतसहस्रंतुनिर्ब्रह्म
व्यक्तचिंतकाइति। वैकारिकोबंधस्तेषांयेविकारानेवभूतेंद्रियाहंकारबुद्धीरुपासतेपुरुषबुध्यातान्
प्रतीदमुच्यतेदशमन्वंतराणीहतिष्ठंतींद्रियचिंतकाः। भौतिकास्तुशतंपूर्णंसहस्रंत्वाभिमानिकाः।
बोद्धादशसहस्राणिनिष्ठंतिविगतज्वराः। तेखल्वमीविदुरार्यायेषांवैकारिकोबंधइति। इष्टापूर्तेनदा
क्षिणः पुरुषतत्त्वानभिज्ञोहीष्टापूर्तंकारीकामोपहतमनाबध्यतइति॥ ॥वैराग्यात्प्रकृतिरूयः सं

सारो भवतिराजसाद्रागात्। ऐश्वर्यादाविद्यातोविपर्ययानद्दिपर्यासः॥ ॥वैराग्यात्प्रकृतिलयः पुरुषतत्त्वानभिज्ञस्यवैराग्यमात्रात्प्रकृतिलयः। प्रकृतिग्रहणेनप्रकृतिमहदहंकारभूतेंद्रियाणिगृह्यंते। तेषामबुध्योपास्यमानेषुलयः। संसारोभवतिराजसाद्रागात्। राजसादित्यनेनरजसोदुःखत्वात्संसारस्यदुःखतासूचिता। ऐश्वर्यादविघातइच्छायाः ईश्वराद्यियद्दिछतितत्तत्करोति। विपर्ययादनैश्वर्यात्तद्दिपर्यासः सर्वत्रइच्छाविघातइत्यर्थः। बुद्धिधर्मान धर्मादीनष्टौभावान्समासव्यासाभ्यांमुमुक्षूणांहेयोपादेयान दर्शयितुंप्रथमतस्तावत्समासमाह। एवप्रत्ययसर्गोविपर्ययाशक्तितुष्टिसिध्याख्यः। गुणवैषम्यविमर्दात्तस्यचभेदास्तुपंचाशत्॥ ॥प्रतीयतेनेनेतिबुद्धिः प्रसवः तस्यसर्गः तत्रविपर्ययोज्ञानमविद्यासा बुद्धिधर्मः। अशक्तिरपिकरणंवैकल्यंहेतुकाबुद्धिधर्मएव। तुष्टिसिद्धीअपिवक्ष्यमाणेबुद्धिधर्मावेव तत्रविपर्ययाशक्तितुष्टियुयथायोगंसमानोधर्मादीनांज्ञानवज्जेमतभेवः। सिद्धेश्चज्ञानस्येति। व्यास माह। तस्यचभेदास्तुपंचाशत्कस्मात्। गुणवैषम्यविमर्दात्। गुणानांवैषम्येतेनोपमर्देएकैकस्यद्वयो द्वयोर्वा। एकैकस्यन्यूनबलता। द्वयाद्वयोर्वा। तेचन्यूनताधिक्यमंदमध्याधिकमात्रतयायथाकार्यमु न्नीयंतेतदिदमुक्तं। गुणानांवैषम्येतेनोपमर्देएकैकस्यद्वयोर्द्वयोर्वाभिभवः। तस्मात्तस्यभेदाः पंचाशद्भि ति। तानेवपंचाशद्भेदान्गणयति। पंचविपर्ययभेदाभवंत्यशक्तिस्तुकरणवैकल्यात्। अष्टाविंशतिर्भे दास्तुष्टिर्नवधाष्टधासिद्धिः॥ ॥अविद्यास्मितारागद्वेषाभिनिवेशायथासंख्यंतमोमोहमहामो हतामिस्रांधतामिस्रसंज्ञाकाः पंचविपर्ययविशेषाः विपर्ययप्रभवानांआस्मितादीनांविपर्ययस्वभाव त्वात्। यद्वाविद्ययाविपर्ययेणकार्यंतेयद्वस्तुआस्मितादयस्तत्स्वभावाः संतस्तदभिनिविशंते। अत

एवपंचपर्वाविपर्ययनिवार्यगण्यः। संप्रतिपंचानांविपर्ययभेदानांअवांतरभेदमाह॥ ॥भेदस्तमसोष्ट विधोमोहस्यचदशविधोमहामोहः। तामिस्रोष्टादशधातथाभवत्यंधतामिस्रः॥॥ भेदस्तमसोवि द्यायाः अष्टविधः अष्टसुअव्यक्तमहदहंकारपंचतन्मात्रेषु। अनात्मसुआत्मबुद्धिरविद्यातमः। त स्याष्टविधविषयत्वादष्टविधत्वं। मोहस्यचा।अत्राप्यष्टविधोभेदइतिचकारेणानुषज्यते। देवात्यष्ट विधंमैश्वर्यंमासाद्यात्मनाभिमानिनः। आणिमादिकमात्मीयंशाश्वतिकमभिमन्यंते। सोयमस्मि तामोहोष्टविधैश्वर्यविषयत्वादष्टविधः। दशविधोमहामोहः। शब्दादिषुपंचसुदिव्यादिव्यतया दशविधेषुविषयेषुरंजनीयेषुरागआसक्तिर्महामोहः। पंचदशविधविषयत्वाद्दशविधः। तामिस्रो द्वेषः सचाष्टादशधाः। शब्दादयोदशविषयारंजनीयाः स्वरूपतःऐश्वर्यंत्वणिमादिकंनस्वरूपतोनु रंजनीयंकिंत्वनुरंजनीयशब्दाद्युपायास्तेचशब्दादयउपस्थिताः परेणोपदृश्यमानाः तदुपाया श्चाणिमादयः स्वरूपेणैवकोपनीयाभवंतीतिशब्दादिभिर्दशभिः सहाणिमाद्यष्टकमष्टादशधे ति। तद्विषयोद्वेषस्तामिस्रोष्टादशविधविषयत्वादष्टादशधेति। तथाभवत्यंधतामिस्रः। अभिनि वेशस्त्रासः तथैस्यनेनाष्टादशधैस्यनुषज्यते। देवाः खलु अणिमादिकमष्टविधंमैश्वर्यंमासाद्य शब्दादीनभुंजानाः शब्दादय भोग्यस्तदुपाया श्चाणिमादयोस्माकमसुरादिभिर्मोपधानिषेधंति बिभ्यति। तदिदंभयमभिनिवेशोधतामिस्रोष्टादशविषयत्वादष्टादशविधइति। सोयंपंचविक ल्पोविपर्ययोवांतरभेदात्द्वाषष्टिरिति। तदेवंविपर्ययभेदानुत्कृष्टांविंशतिभेदामशक्तिमाह॥ एकादशेंद्रियवधाः सहबुद्धिवधैरशक्तिरुद्दिष्टा। सप्तदशधाचबुद्धेर्विपर्ययानुष्टिसिद्धीनां॥ ॥

एकादशेंद्रियवधाः। बाधियंकुष्टितो। धत्वंजउतानाजिघ्नतातथामूकताकोण्यपंगुत्वंकुब्जोदावर्तमुग्धताः। यथा
सर्वंश्रोत्रादीनामिंद्रियाणांवधाः एतावत्सेवतुतंद्वेतुबुद्धेरशक्तिः स्वव्यापारोभवति। तथाचेदंकारणंहेतुत्वादे
कादशधाबुद्धेरशक्तिरुच्यते। हेतुहेतुमतोरभेदविवक्षयाचसामानाधिकरण्यं। तदेवमिंद्रियंवधइतिरणबु
द्धेरशक्तिमुत्कास्वरूपतोशक्तीराह। सहबुद्धिवधैरिति। कतिबुद्धेः स्वभावतोवधाइत्यत आह। समदशधाच
बुध्येः। कुतः। विपर्ययादुष्टसिद्धीनां। तुष्टयोनवधेतितद्विपर्ययात्तन्निरूपणान्नव भवंति। एवंसिद्धयोष्टाविति
तद्विपर्ययात्तननिरूपणादष्टौ भवंतीति। तुष्टिर्नवधेत्युक्ताः परिगणयति। अध्यात्मिकाश्चनस्रः प्रकृत्युपादा
नकालभाग्याख्याः। बाह्याविषयोपरमात्यंचचनवतुष्टयोभिमतः॥ ॥प्रकृतिव्यतिरिक्तआत्मास्तीतिप्रति
पत्तिश्रवणमननविवेकसाक्षात्कारायत्तसद्पदेशानुष्ठेयोनश्रयतेते। तस्यचतस्त्रआध्यात्मिकास्तुष्टयोभ
वंतिप्रकृतिव्यतिरिक्तमात्मानमधिकृत्ययस्मात्तास्तुष्टयस्तस्मादाध्यात्मिकाः। कालाइत्यत आह। प्रकृत्युपा
दानकालभाग्याख्याः। प्रकृत्यादिराख्यायासांतास्तथोक्ताः। तत्रप्रकृत्याख्यातुष्टिर्यथाकस्यचिदुपदेशाद्विवे
कसाक्षात्कारोहिप्रकृतिपरिणामभेदस्यंचप्रकृतिरेवकरोतीतिकृतंतेनेन ध्यानाभ्यासेनतस्मादेवमेवास्य
वत्सेतियेयमुपदिश्यशिष्यस्यप्रकृत्याख्यातुष्टिः साप्रकृत्याख्यांभजुच्यते। यातुप्राकृत्यपिविवेकख्यातिर्नस्यात्प्र
कृतिमात्राद्भवति। माभूत्सर्वस्यसर्वदानन्मात्रस्यसर्वान्प्रत्यविशेषात्। प्रव्रज्यायास्तुभवति। तस्मात्प्रव्रज्यामु
पादत्तेथाः कृतंध्यानाभ्यासेननवायुष्मान्निस्तुपदेशोयातुष्टिः सोपादानाख्यासत्प्रकृमुच्यते। यातुप्रव्रजापि
नस्यैनिर्वाणदेतिसेवकालपरिपाकपरिपाकमपेक्ष्यसिद्धिंविधास्यत्सकालमुत्तमतयातंवत्युपदेशोयातुष्टिः
साकालाख्याओघउच्यते। यातुनकालाभ्युपादानाद्विवेकख्यातिरपितुभाग्यादेव। अतएवमदाकृसाप

स्यानिअनिबाकानिमानुरुपदेशादेवविवेकख्यातिमतिमुक्तानिवभवुः तद्भाग्यमेवहेतुर्नान्यदितिउपदेशो
यातुष्टिः सा भाग्याख्यातुष्टिर्दृष्टिरुच्यते। बाह्यादर्शयति। बाह्यास्तुष्टयोविषयोपरमात्यंच। याः खल्वनात्म
नः प्रकृतिमहदहंकारादीनात्मेत्यभिमन्यमानस्यवैराग्येसतितुष्टयस्ताः बाह्याः आत्मज्ञानाभावेनात्मा
नमधिकृत्यप्रकृतिरिति। ताश्चवैराग्येसतिसंभवंतितुष्टयइतिवैराग्यहेतुपंचत्वोद्वैराग्याण्यपिपंच। तत्र
चत्वारितुष्टयः पंचेति। उपरम्यतेनेनेत्युपरमोवैराग्यविषयादुपरमः विषया भोग्याः शब्दादयः पंच। उपरमाअ
पिपंच। तथात्यर्जनरक्षणक्षयभोगहिंसादोषदर्शनंहेतुजन्मानः उपरमाः पंच भवंति। तथाहि। सेवाद
योधनार्जनोपायास्तेचसेवकादीन्दुःखाकुर्वंति। दृष्यदुरीश्वरहाः स्यदंउिचंउार्द्रचंद्रजा। वंदेनोभावयन्
प्राज्ञः कःसेवासुभवर्तते। एवमन्येप्यर्जनोपयादुःखाइतिविषयोपरमेयातुष्टिः सैकापारमुच्यते। तथा
र्जितंधनंराजेकागारिकाभिर्जलोद्वादिभ्योविनेष्यतीतितद्रक्षणेमहद्दुःखमीतिभावयतोविषयोपर
मेयातुष्टिः साद्वितीयासुपारमुच्यते। तथामहतायासेनउपार्जितंधनंभुज्यमानंक्षीयतइतिक्षयंभा
वयतोविषयोपरमेसतियातुष्टिः सातृतीयापारपारमुच्यते। एवंशब्दादिभोगाभ्यासात्प्रवर्द्धते। कामात्ते
चविषयाप्राप्तोकामिनंदुनंतीतिभोगदोषंभावयतोविषयोपरमेसतियातुष्टिः साचतुर्थीअनुत्तमोभ
उच्यते। एवंनानुपहतभूतानिविषयोपभोगोभवतीतिहिंसादोषदर्शनात्विषयोपरमेसतियातुष्टिः
सापंचमीउत्तमोभउच्यते। तदेवमाध्यात्मिकाश्चतस्रभिर्बाह्याभिः पंचभिर्नवतुष्टयोभिहिताः। गौण
मुख्यभेदभिन्नाः सिद्धीराह॥ ॥ऊहः शब्दाध्ययनंदुःखविघातास्त्रयः सुहृत्प्राप्तिः। दानंचसिद्धयो
ऽष्टौसिद्धेः पूर्वोंकुशस्त्रिविधः॥ ॥विहन्यमानस्यत्रित्वात्तद्विघातास्त्रयः इतीमामुख्यास्तिस्रः सिद्धयः

तदुपायतयाचेतरागोण्यः पंचसिद्धयस्ता अपिहेतुहेतुमत्तयाव्यवस्थिताः। तत्राद्याध्ययनलक्षणासिद्धिरे
तुरेव। मुख्यास्तुसिद्धयोहेतुमत्स्वेवामध्यमास्तुहेतुहेतुमत्यः। विधिवद्गुरुमुखादध्यात्मविद्यानामक्षर
स्वरूपग्रहणं। अध्ययनंप्रथमासिद्धिस्मारभ्यते। तत्रार्थः शब्दः शब्दइतिशब्दजन्यमर्थज्ञानमुपलक्ष
यतिकार्यकारणोपचारात्सादितीयासिद्धिः सुतरमुच्यते। ऊहस्तर्कः आगमाविरोधिन्यायेनागमा
र्थपरीक्षणं। परीक्षणंच संशयपूर्वंपक्षनिराकरणेनोत्तरपक्षस्थापनं। तदिदमनुमानमाचक्षते। आग
मिनः सातृतीयासिद्धिस्मारभ्यते। सुहृत्प्राप्तिर्न्यायेनस्वयंपरीक्षितमप्यर्थंनश्रद्दधते। नयाव
द्गुरुशिष्यसब्रह्मचारिभिः सहसंवाद्यते। अतः सुहृद्दागुरुशिष्यसब्रह्मचारिणांसंवादकानाप्राप्तिः सु
हृत्प्राप्तिः। साचतुर्थीरम्यकेऽभ्युच्यते। दानंचशुद्धिर्विवेकज्ञानस्यहेतवो। धनेऽस्मादानोदानप
दव्युत्पत्तेः। यथाह भगवान्पतंजलिः। विवेकख्यातिरविप्लवाहानोपायइति। अविप्लवः
शुद्धिः साचसंवासनसंशयविपर्यासानांपरिहान्याविवेकसाक्षात्कारस्य स्वच्छप्रवाहेवस्थानं। साचन
विनादानेनैरन्तर्यदीर्घकालोपसेवितान्यासपरीपाकाद्भवतीतिदानेनविवेकख्यातेराकार्येण सोपिसं
गृहीतः सेयंपंचमीसिद्धिः सदामुदितमुच्यते। तिस्रश्चमुख्याः सिद्धयः प्रमोदमुदितमोदमानाइत्य
शेसिद्धयः। अन्येतुव्याचक्षतेविनोपदेशादिनाप्राग्वीर्याभ्यासवशान्नत्वस्यस्वयमूहनंयत्सासि
द्धिरूहः। यस्यसांख्यशास्त्रपाठमन्तरेणसांख्यशास्त्रंश्रुतवतः। ज्ञानमुत्पद्यते। सासिद्धिः शब्दः शब्दपाठान
तरंभावात्। यस्यशिष्याचार्यसंबंधेनसांख्यशास्त्रंग्रंथतोर्थतश्चाधीतंज्ञानमुत्पद्यते। साध्ययनहे
तुकासिद्धिरध्ययनं। सुहृत्प्राप्तिरितियस्याधिगतंतत्वंसुहृदंप्राप्यज्ञानमुत्पद्यतेसाज्ञानलक्षणा

२४

147/193

सिद्धिः सुहृत्प्राप्तिः। दानंचसिद्धिहेतुर्धनादिदानेनाराधितोज्ञानीज्ञानंप्रयच्छतीति। अस्ययुक्तायुक्तत्वेसरि
रेवावगंतव्येइतिकृतंपरदोषोद्भावनेननः सिद्धांतमात्रव्याख्यानप्रवृत्तानामिति। सिद्धितुष्टिविपर्ययेणाशक्ति
वृद्धिवधःसप्तदशधाद्रष्टव्यः अत्रप्रत्ययसर्गोसिद्धिरुपादेयेतिप्रसिद्धमेवतन्निवारणहेतवस्तुविपर्ययाशक्ति
तुष्टयोहेयाइत्याह। सिद्धेः पूर्वोकुशास्त्रिविधः पूर्वइतिविपर्ययाशक्तितुष्टीः परामृशतिताः सिद्धिकरिणी
नां अंकुशोनिवारकत्वात्। अतः सिद्धिपरिपंथित्वादंकुशइवेतिविपर्ययाशक्तितुष्टयोहेयाइत्यर्थः। स्यादे
तत्। पुरुषार्थप्रयुक्तासृष्टिः सचपुरुषार्थः प्रत्ययसर्गाद्वातन्मात्रसर्गाद्वासिध्यतीतिकुतमुभयसर्गेणस
तआह। नविना भावैर्लिंगंनविनालिंगेन भावनिर्वृतिः। लिंगाख्योभावाख्यस्तस्माद्विविधः प्रसर्गः॥ ॥
लिंगाख्यतिन्मात्रसर्गमुपलक्षयति। भावैरितिप्रत्ययसर्गं। एतदुक्तंभवति। तन्मात्रसर्गस्यपुरुषार्थसा
धनत्वंस्वरूपंचनप्रत्ययसर्गाद्विना भवति। एवंप्रत्ययसर्गस्यस्वरूपंपुरुषार्थसाधनत्वंचनतन्मात्रसर्गाद्वि
नाइत्युभयसर्गप्रवृत्तिः। भोगः पुरुषार्थेन भोग्याञ्शब्दादीन् भोगायतनंचशरीरहृयमंतरेण भवत्युप
पन्नस्तन्मात्रसर्गः। एवंसएव भोगो भोगसाधनानींद्रियाण्यंतः करणानि चांतरेणन भवंति। नचतानि
धर्मादीन् विना। नचापवर्गहेतुर्विवेकख्यातिरुभयसर्गं विनेसुपपन्नउभयविधः सर्गः। अनादित्वाच्च
बीजांकुरवन्नान्योन्याश्रयदोषमावहति। कल्पादावपिवप्राचीनकल्पोत्पन्न भावलिंग संस्कारवशाद्भाव
लिंगयोरुत्पत्तिर्नानुपपन्नेतिसर्वमवदातं। विभक्तः प्रत्ययसर्गस्तन्मात्रसर्गंविभजते॥ ॥अष्टविकल्पो
दैवस्तैर्यग्योनश्चपंचधाभवति। मानुष्यश्चैकविधः समासतो भौतिकः सर्गः॥ ॥ब्राह्मआजापत्येंद्रपै
त्रगाधर्वयक्षराक्षसपैशाचाइत्यष्टविधोदैवसर्गः। तैर्यग्योनश्चपंचधाभवति। पशुमृगसरीसृपप

क्षिस्थावराः। मानुषश्चैकविधः। ब्राह्मणत्वादवांतरजातिभेदविवक्षया। संस्थानस्यचतुर्धविशेषादिति। समा
मतः संक्षेपतः भौतिकः सर्गः घटादयस्त्वशरीरत्वेपिस्थावराएवेति। भौतिकस्यसर्गस्यचेतन्यात्कर्षनिकर्ष
तारतम्याभ्यांउर्ध्वाधोमध्यभावितत्रैविध्यमाह॥ ॥ऊर्ध्वंसत्वविशालस्तमोविशालश्चमूलतः। सर्गः। मध्ये
रजोविशालोब्रह्मादिस्तंबपर्यंतः॥ ॥यत्प्रभृतिसत्वोत्तोलोकः सत्वबहुलः। तमोविशालश्चमूलतः स
र्गः। पश्वादिस्थावरांतः। सोयंमोहमयत्वात्तमोबहुलः। भूर्छोकस्तुसमद्वीपसमुद्रसन्निवेशोमध्येरजो
बहुलः धर्माधर्मानुष्ठानपरत्वात्दुःखबहुलत्वाच्च। तामिमांलोकस्थितिसंक्षिपतिः। ब्रह्मादिस्तंबपर्यं
तः। स्तंबग्रहणेनबह्वाद्यः संगृहीताः। तदेवंसर्गंदर्शयित्वातस्यापवर्गसाधनवैराग्योपयोगिनीदुःख
हेतुतामाह॥ ॥तत्रजरामरणकृतंदुःखंप्राप्नोतिचेतनःपुरुषः। लिंगस्याविनिवृत्तेस्तस्माद्दुःखंस्वभावे
न॥ ॥यद्यपिविविधविचित्रानंदभोगभोगिनः। प्राणभृद्वर्गाः तथापिजरामरणकृतंदुःखमविशिष्ट
सर्वस्यखलुलोकेरपिमरणत्रासोमहान्। भूयंभूयासमित्येवमादिकोस्तिदुःखंच भयहेतुरितिमरणंदुः
खं। स्यादेतत्। दुःखादयः प्रकृतावुद्भिगुणाः कथमेतेचेतनसंबंधिनोभवंतीत्यतआह। पुरुषइति। पुरि
लिंगेशेतइतिपुरुषः लिंगंचतत्संबंधितिचेतनोपितत्संबंधीभवतीत्यर्थः। कुतः पुनर्लिंगसंबंधिदुः
खंपुरुषस्येत्यतआह। लिंगस्याविनिवृत्तेः पुरुषार्थेहेतुत्वाल्लिंग धर्मान्। आत्मन्यध्यवस्यतिपुरुषः
अथवादुःखंप्राप्नावधिराउक्तःयंतलिंगंयावन्ननिवर्त्ततेतावदिति। उक्तस्यसर्गस्यकारणविप्रतिप
त्तीन्निराकरोतिइत्येषप्रकृतिकृतोमहदादिविशेषभूतपर्यंतः। प्रतिपुरुषविमोक्षार्थंस्वार्थइवपरा
र्थआरंभः। आरभ्यइतिआरंभः सर्गः प्रकृत्येवकृतोनेश्वरेण। नब्रह्मोपादानः। नाप्यकारणः अकार

णत्वेसत्यनाभावोस्यतभावोभवेत्। नब्रह्मोपादानश्चिन्निशक्तेरपरिणामात्। नेश्वराधिष्ठितप्रकृतिकृतो
निर्व्यापारस्याधिष्ठातृत्वाभावात्। नहिनिर्व्यापारस्तक्षावास्याद्यधिनिष्ठति। ननु प्रकृतिकृतश्चेतनस्यानि
त्यायाः प्रकृतिशीलायाअनुपरमात्संदेवसर्गः स्यान्नकश्चिन्मुच्यतेत्यतआह। प्रतिपुरुषविमोक्षार्थंस्वा
र्थइवपरार्थआरंभः। यथौदनकामओदनायपाकेप्रवृत्तओदनसिद्धेर्निवर्त्तते। एवंप्रत्येकपुरुषान्मो
चयितुंप्रवृत्ताः प्रकृतिः यंपुरुषंमोचितवतीतंपुरुषंप्रतिनपुनः प्रवर्त्ततेतदिदमाह। स्वार्थंस्वस्यार्थंयथात
थापरार्थंआरंभेत्यर्थः॥ ५६ ॥स्यादेतत्। स्वार्थंपरार्थंवाचेतनः प्रवर्त्तते। नचप्रकृतिरचेतनेनेकंप्रवर्त्तितुम
र्हतितस्मादस्तिप्रकृतेराधिष्ठाताचेतनः। नचक्षेत्रक्षाज्ञश्चेतनाअपिप्रकृतिमधिष्ठातुमर्हंति। तेषांप्रकृ
तिस्वरूपानभिज्ञत्वात्। तस्मादस्तिसर्वार्थदर्शीप्रकृतेराधिष्ठातासचेश्वरइत्यतआह॥ ॥वत्सविवृद्धिनि
मित्तंक्षीरस्ययथाप्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तंतथाप्रवृत्तिः प्रधानस्य। दृष्टमचेतनमपिप्रयोजने
नप्रवर्त्तमाने। यथावत्सविवृध्यर्थंक्षीरमचेतनंप्रवर्त्तते। एवंप्रकृतिरचेतनापिपुरुषमोक्षायप्रवर्त्तिष्यते। न
चक्षीरप्रवृत्तेरपीश्वराधिष्ठाननिबंधनत्वेनसाध्यत्वान्नसाध्येनव्यभिचारइतिसाम्प्रतं। प्रेक्षावत्प्रवृत्तेः स्वार्थकारु
ण्याभ्यांव्याप्तत्वात्। नचजगत्सर्गाव्यावर्त्तमानेप्रेक्षावत्प्रवृत्तिपूर्वकत्वमपिनिवर्तयतः। नह्यवाससकलेप्सित
स्यभगवतोजगदभिसृक्षतः किमपीप्सितेन भवति। नापिकारुण्यादस्यसर्गेप्रवृत्तिः प्राक्सर्गाज्जीवानामि
न्द्रियशरीरविषयानुत्पत्तेर्दुःखाभावेनकस्यदुःखप्रहाणेच्छाकारुण्यं। सर्गोत्तरकालंदुःखिनोवीक्ष्यकारुण्या
भ्युपगमेदुरुत्तरमितरेतराश्रयत्वं। कारुण्येनसृष्टिः सृष्ट्याचकारुण्यमिति। अविचकरुणायाप्रेरितः सुखिनए
वजंतूनसृजेत्। नविचित्रान्। कर्मवैचित्र्यानपेक्षैचित्र्यमितिचेत्। श्रुतमस्यप्रेक्षावतः कर्माधिष्ठानेन। तदनधिष्ठा

नमात्रादेवशरीरेंद्रियविषयानुत्पत्तेर्दुःखानुत्पत्तेःसुकरत्वात्। अकृतेस्त्वचेतनायाः प्रवृत्तेर्नस्वार्थयद्दोनवाक
रुण्यप्रयोजकमितिनोक्तदोषप्रसंगावतारः। पारार्थ्यमात्रंतुप्रयोजनमुपपद्यतएवस्मात्सुष्ठूक्तंवत्सविवृद्धिनिमि
त्तमिति॥ ॥स्वार्थइवेतिदृष्टांतितंविभजते॥ ॥औत्सुक्यनिवृत्यर्थंयथाक्रियासुप्रवर्त्ततेलोकः पुरुषस्यविमो
क्षार्थंप्रवर्त्ततेतद्वदत्रापि॥ ॥औत्सुक्यमिछासारवत्विष्यमाणप्राप्तौनिवर्त्तते। इष्यमाणश्चस्वार्थः इष्टलक्षण
त्वात्फलस्य। दार्ष्टांतिकेयोजयति। पुरुषस्यविमोक्षार्थंप्रवर्त्ततेतद्वदत्रापि। ननुभवतुपुरुषार्थः प्रकृतेः प्रवर्त्त
कोनिवृत्तिस्तुकुतस्त्याप्रकृतेरित्यतआह॥ ॥रंगस्यदर्शयित्वानिवर्त्ततेनर्त्तकीयथानृत्यात्। पुरुषस्यतथात्मा
नंप्रकाश्यनिवर्त्तते। प्रकृतिः॥ ॥रंगस्येतिस्थानिनस्थानिनः पार्षदानुपलक्षयति। आत्मानंशब्दाद्यात्मना
पुरुषाद्वेदनंचप्रकाश्यंस्यर्थः। स्यादेतत्। प्रवर्त्ततांप्रकृतिः पुरुषार्थंपुरुषादुपकृत। प्रकृतिरूप्यतेकंचिदुपकारं
आज्ञासंपादनाराधितादिवाज्ञापयितुर्भुजिष्या। तथाचनपरार्थोस्याआरंभइत्यतआह। नानाविधैरुपायैरुप
कारिण्यनुपकारिणः पुंसः गुणवत्यगुणस्यसतंवत्सस्यार्थमपार्थकंचरति॥ ॥यथागुणवानुपकार्यपिभृत्यः अत
एवनिर्गुणेनुपकारिणीस्वामिनिष्फलारंभः। एवमियंप्रकृतिस्तपस्विनीगुणवत्युपकारिण्यनुपकारिणीनिर्गुणेपु
रुषेव्यर्थश्रमेतिपुरुषार्थमेवयतनेनस्वार्थमितिसिद्धं। स्यादेतत्। ननर्तकीनृत्यंपरिषद्भ्योदर्शयित्वानिवर्ततेरापिपुन
स्तत्कृतदूरात्मवर्तनेयथा। तथाप्रकृतिः पुरुषायात्मानंदर्शयित्वानिवर्त्तापिपुनस्तवरूपेणतीत्यतआह॥ ॥प्रकृतेः
सुकुमारतरंनकिंचिदस्तीतिमेमतिर्भवति। यादृशास्मीतिपुनर्नेदर्शनमुपेतिपुरुषस्य। सुकुमारतरमिति। सुकु
मारतरताअतिशयेशत्रुनापरपुरुषदर्शनासहिष्णुतेतियावत्। अस्यैपश्यादिकुरुवधूरितिमंदाक्षमंथराप्र
मादाद्विगलितस्निचयांचलांचेदालोक्यतेपरपुरुषेणतदासौतथाप्रयततेप्रमत्तायथैनांपुरुषांतराणिनपुनः

151/1935

पश्यंतीति। एवंप्रकृतिः कुलवधूतोप्यधिकादृष्टाविवेकेननपुनर्द्रष्टव्यतइत्यर्थः। स्यादेतत्। पुरुषश्चेदगुणोप
रिणामीकथमस्यमोक्षः मुच्येबंधनविश्लेषार्थत्वात्। सवासकृच्छुभाशुभकर्मविपाकाशयानांचबंधनसमाख्यातानां
पुरुषेपरिणामिनिअसंभवात्। अतएवनास्यसंसारः प्रेत्यभावापरनामास्ति। निष्क्रियत्वात्। तस्मात्पुरुषविमो
क्षार्थमितिरिक्तंवचइतीमामाशंकामुपसंहारव्याजेनाभ्युपगछन्नपाकरोति॥ ॥तस्मान्नबध्यतेद्धानमुच्य
तेनापिसंसरतिकश्चित्। संसरतिबध्यतेमुच्यतेतुनानाश्रयाप्रकृतिः॥ ॥अद्धानकश्चित्पुरुषः संसरति।
नकश्चित्पुरुषोमुच्यतेइति। प्रकृतिरेवतुनानापुरुषाश्रयासतीबध्यतेसंसरतिमुच्यतेचेतिबंधमोक्षसंसाराः
पुरुषेउपचर्यंते। यथाजपपराजयेभृत्यगतावपिस्वामिन्युपचर्यंते। तदाश्रयेणभृत्यानांतद्भागित्वात्। तत्
फलस्यचशोकलाभादेः स्वामिसंबद्धत्वात्। भोगापवर्गयोः प्रकृतिगतयोरपिविवेकाग्रहात्पुरुषसंबंध
उपपादितइतिसर्वंपुष्कलं॥ ॥ननुअंगगतंप्रकृतिगतारबंधसंसारापवर्गौः पुरुषउपचर्यतइतिकिंसाध
नाःपुनरेतेप्रकृतेरित्यतआह। रूपैः सप्तभिरेवतुबध्नात्यात्मानमात्मनाप्रकृतिः। सैवचपुरुषार्थंप्रतिविमो
चयत्येकरूपेण॥ ॥तत्वज्ञानवर्जैर्बध्नातिधर्मादिभिः सप्तभीरूपैर्भावैरितियावत्। पुरुषार्थंप्रतिभोगा
पवर्गप्रति। विमोचयत्यात्मानमात्मना। एकरूपेणतत्वज्ञानेनविवेकख्यात्याविमोचयतिनपुनर्भोगापवर्गौक
रोतीत्यर्थः। अवगतमिदानींमीदृशंतत्वंततः किमित्यतआह॥ ॥एवंतत्वाभ्यासान्नास्मिनमेनाहमित्यपरिशेषं
अविपर्ययाद्विशुद्धंकेवलमुत्पद्यतेज्ञानं॥ ॥तत्वेनविषयेणविषयिज्ञानमुपलक्ष्यते। उक्तप्रकारतत्वविषय
ज्ञानाभ्यासादनेरतयदीर्घकालसेवितात्। सत्पुरुषान्यतासाक्षात्कारिज्ञानमुत्पद्यते। यद्विषयोभ्यासस्त
द्विषयकमेवसाक्षात्कारमुपजनयति। तत्वविषयश्चाभ्यासइतितत्वविषयमेवसाक्षात्कारंजनयति। अतउ

कंविशुध्यमिति।कुतोविशुध्यमित्यतआह।अविपर्ययादिति।संशयविपर्ययौज्ञानस्याविशुद्धीतरहितंविशुद्धंत
दिदमुक्तंअविपर्ययादिति।नियतमनियतनतयाग्रहं नूसंशयोपिविपर्ययः।तेनाविपर्ययादितिसंशयविप
र्ययाभावोदर्शितः।तत्वविषयत्वाच्चसंशयविपर्ययाभावः।स्यादेतत्।उत्पद्यतामीदृशाभ्यासात्तत्वज्ञानंतथाप्य
नादिनामिथ्याज्ञानसंस्कारेणमिथ्याज्ञानंजनयितव्यतयाचतन्निबंधनस्यसंसारस्यानुच्छेदप्रसंगइत्यतउक्तं
कैवल्यमिति।विपर्ययेणासंभिन्नं।यद्यप्यनादिर्विपर्ययवासना।तथापितत्वज्ञानवासनायातत्वविषयसाक्षा
त्कारमादधत्याआदिमत्परंदर्शयितुंशक्यासमुच्छेत्तुं।तत्पक्षपातोहिधियांस्वभावः।यथाऽऽर्षेत्याआपि।निरुपद्रव
भूतार्थस्वभावस्यविपर्ययैः।नवाधोयत्कल्पेपिबुद्धेस्तत्पक्षपातनइति।ज्ञानस्वरूपमुक्तंनास्मिनमेनाहमिति।
नास्मीत्यात्मनिक्रियामात्रंनिषेधति।यथाऽऽर्षः।स्वभावस्तपःक्रियासमान्यवचनाइति।तथाचाध्यवसायाभिमानसं
कल्पालोचनानिचात्राणिवात्माश्रयेव्यापाराआत्मनिप्रतिषिद्धाबोद्धव्याः।यतश्चात्मनिव्यापारावेशोनास्ती
तिअतोनाहंअहमितिकर्हपदंअहंजानामिअहंयजेअहंदहेअहंभुंजइतिसर्वेप्रकर्तुः।परामर्शात्निषू
क्रियत्वेचकर्तृत्वाभावोतःसुष्ठुक्तंनाहमिति।अतएवनमेकर्तास्वामितांलभते।तदभावात्तुकुतोभाविकी
स्वामितेत्यर्थः।अथवा।नास्मीतिपुरुषोस्मिनप्रसवधर्मा।अप्रसवधर्मित्वाच्चकर्तृत्वमाह।नाहमिति। अ.
कर्तृत्वाच्चनस्वामितेत्याह।नमेइति।नन्वेतावत्सुज्ञातेषपिकश्चित्कदाचिदज्ञातोविषयोस्तितदज्ञानंचजन्तून्व
धयिष्यतीत्यतउक्तं।अपरिशेषमिति।नास्तिकिंचिदस्मिन्परिशिष्टंज्ञातव्यपदज्ञानंबंधयिष्यतीत्यर्थः।किंपु
नरनेनेदृशेनतत्वसाक्षात्कारेणसिध्यतीत्यतआह॥ ॥तेननिवृत्तप्रसवामर्थवशात्सप्तरूपविनिवृत्तां।प्रकृ
तिंपश्यतिपुरुषःप्रेक्षकवदवस्थितःसुस्थः॥ ॥भोगविवेकसाक्षात्कारोहिप्रकृतेःप्रसोतव्यो।तोचप्रसूता

153/1935

वितिनास्याःप्रसोतव्यमवशिष्यतेयत्प्रसोष्यतेइतिनिवृत्तप्रसवाप्रकृतिःविवेकज्ञानरूपोयोर्थस्तस्यवशःसा
मर्थ्यंतस्मात्।अतत्वज्ञानरूपाणिखल्वधर्मोधर्मैश्वर्यानैश्वर्यंवैराग्यावैराग्याज्ञानानि।वैराग्यमपिकेवलंनो
पिकानामतत्वज्ञानपूर्वकमेव।तत्रतत्वज्ञानंविरोधित्वेनातत्वज्ञानमुच्छिनत्ति।कारणनिवृत्त्याचसप्तरूपाणि
निवर्तंतइतिसप्तरूपनिवृत्ताप्रकृतिः।अवस्थितइतिनिष्क्रियः।सुस्थइतिरजस्तमोवृत्तिकलुषयाबुध्यासमि
श्रः।सात्विक्यातुवृत्त्यातदाप्यस्यमनाकसंभेदोस्त्येव।अन्यथैवंभूतप्रकृतिदर्शीमानुपपत्तेरिति।स्यादेतत्।नि
वृत्तप्रसवामितिनमृषामहे।संयोगकृतोहिसर्गइत्युक्तंयोग्यतात्वंसंयोगःभोक्तृत्वंयोग्यतात्वंपुरुषस्यचेत
न्यं।भोग्यत्वंयोग्यतात्वंप्रकृतेर्जडत्वं।विषयत्वंचनयोश्चेतनयोरस्तिनिवृत्तिः।नचकरणीयाभावान्निवृत्तिः।तज्जा
तीयस्यान्यस्यकरणीयत्वात्पुनःपुनःशब्दाद्युपभोगइत्यतआह॥ ॥दृष्टमयेत्युपेक्षकएकोदृष्टादृमित्यु
परमत्यन्या।सतिसंयोगेपितयोरप्रयोजनं।नास्तिसर्गस्य॥ ॥करोतुनामपौनःपुन्येनशब्दाद्युपभोगंप्रकृति
रनयाविवेकख्यातिर्निवर्तयतीति।कृतविवेकख्यातिस्तुनशब्दाद्युपभोजयति।अविवेकख्यातिर्निबंधनोहित
दुपभोगोनिबंधनाभावे।नभवितुमर्हतिअंकुरइवबीजाभावे।प्रकृतान्हिसुखदुःखमोहात्मनःशब्दादीन
तदविवेकान्ममैतदित्यभिमन्यमानआत्माभुंजीत।एवंविवेकख्यातिमपिप्रकृतीर्मविवेकादेशात्मामद
र्थेयमितिमन्यते।उत्पन्नविवेकख्यातिस्तुतदसंसर्गान्नशब्दादीन्भोक्तुमर्हति।नापिविवेकख्यातिप्रकृ
तीर्नोविविक्तआत्मास्वार्थंममिमंतुमर्हतीति।पुरुषार्थोचभोगविवेकोप्रकृत्यारंभप्रयोजकाविसपुरु
षार्थोसतीनप्रकृतिप्रयोजयतइतितदिदमुक्तंप्रयोजनंनास्तिसर्गस्येति।प्रयुज्यतेहिसर्गेप्रकृतिरने
नेतिप्रयोजनंतदपुरुषार्थत्वेनास्तीत्यर्थः॥ ॥स्यादेतत्।उत्पन्नतत्वसाक्षात्कारश्चेदनंतरमेवमुक्तस्यतस्यश

रीरपातःस्यात्कथमहदहः प्रकृतिं पश्येत्। अथतत्त्वज्ञानेपिनमुच्यतेकर्मणामक्षीणत्वात्। तेषांकुतःप्रक्षयः
भोगादिमितिचेत्। हंनभोस्तत्त्वज्ञानंनमोक्षसाधनमितिव्यक्ताव्यक्तज्ञतत्त्वविज्ञानेनापवर्गइतिरिक्तंवचः
भोगेनत्वपरिसंख्येयःकर्माशयप्रचयोनियतविपाकसमयःक्षेतव्यः। ततश्चापवर्गप्राप्तिरित्यपिमनोर
थमात्रमित्यतआह॥ ॥सम्यग्ज्ञाना धिगमाद्धर्मादीनामकारणप्राप्तोतिष्ठतिसंस्कारवशाच्चक्रभमि
वद्धृतशरीरः॥ ॥तत्त्वसाक्षात्कारादेवानादिरप्यनियतकालोविपाकोपिकर्माशयप्रचयोदग्धबीजभाव
तयानजात्वायुर्भोगलक्षणायफलायकल्पतेकुशासलिलावासिक्तायांबुद्धिभूमौकर्मबीजान्यंकुरा
नप्रसुवते। तत्त्वज्ञाननिदाघपीतसकलकुशासलिलायामूषरायांकुतःकर्मबीजांकुरप्रसवः। तदिदमुक्तं
धर्मादीनामकारणप्राप्तावितिअकारणतापाप्तावित्यर्थः। उत्पन्नतत्त्वज्ञानोपिसंस्कारवशाच्चतिष्ठतियथोपर
तेकुलालव्यापारेचक्रवेगाख्यसंस्कारवशाद्भ्रमतिष्ठति। कालपरिपाकवशात्परतेसंस्कारेनिष्क्रियंभवति
शरीरस्थितौचप्रारब्धपरिपाकोधर्माधर्मौसंस्कारः। यथानुश्रूयते। भोगेनत्वितरेक्षपयित्वासंपद्यते। तस्या
तावदेवचिरंयावन्नविमोक्ष्येअथसंपत्स्यइति। क्षीयमाणाविद्यासंस्कारशेषश्चसंस्कारस्वदृशात्। सामा
र्थ्यादेतच्छरीरंश्लिष्यति। स्यादेतत्। यदिसंस्कारवशादपिधृतशरीरस्तदाकदास्यमोक्षोभवतीत्यतआह॥ ॥
प्राप्तेशरीरभेदेचरितार्थत्वोत्तरधानविनिवृत्तौ। एकांतिकमात्यंतिकमुभयंकैवल्यमाप्नोति॥ ॥अनारब्धकर्म
विपाकानांतावत्कर्माशयानांतत्त्वज्ञानाग्निनाबीजभावोदग्धः प्रारब्धविपाकानांतु भोगेनक्षयेसति प्राप्तेशा
रीरभेदेविनाशचरितार्थत्वात्। रुतप्रयोजनत्वात्तस्थानस्यतंपुरुषंप्रतिनिवृत्तौएकांतिकमवश्यंभावि। आ
त्यंतिकमविनाशीसुभयंकैवल्यंदुःखत्रयविगमंप्राप्नोतिपुरुषः॥ ॥अत्रप्रमाणोपपादितेप्यत्यंतश्रद्धा

२८

155/1935

त्पादनायपरमर्षिपूर्वकत्वमाह॥ ॥पुरुषार्थज्ञानमिदंगुह्यंपरमर्षिणासमाख्यातं। स्थित्युत्पत्तिप्रलयाश्चि
न्तेयत्रभूतानां॥ ॥गुह्यंगुह्यानिवासिस्थूलधियांदुःखबोधमितियावत्। परमर्षिणाकपिलेन। तामे
वश्रद्धामार्गेमिकत्वेनदृढयति। स्थित्युत्पत्तिप्रलयाश्चिंतेयत्रभूतानां। यत्रज्ञानेयदर्थं। यथाचमणिद्र
पिनेहंतीति। भूतानांस्थित्युत्पत्तिप्रलयाः। अधर्मेश्चिंत्यंते॥ ॥स्यादेतत्। यदियत्परमर्षिणासाक्षात्कथि
तंतद्यदृधीमहि। यत्पुनरीश्वरकल्पेनकथितंतत्कथंश्रद्देयमित्यतआह॥ ॥एतत्पवित्रमग्र्यंमुनिरा
सुरयेनुकंपयाप्रददौ। आसुरिरपिपंचशिखायतेनचबहुधाकृतंतंत्रं॥ ॥पवित्रंपावनंदुःखत्रयहेतोः
पाप्तनःपुनातीति। अग्र्यायतः सर्वेभ्यः पवित्रेभ्योमुख्यं। मुनिः श्रीकपिलः आसुरयेनुकंपयाप्रददौ।
आसुरिरपिपंचशिखायतेनचबहुधाकृतंतंत्रं॥ ॥शिष्यपरंपरयागतमीश्वरकृष्णेनचेतदार्याभिः।
संक्षिप्तमार्यमतिनासम्यग्विज्ञायासिद्धांतं॥ ॥आराद्यातातत्त्वज्ञानेभ्यइत्यार्या। आर्यामतिर्यस्य
सोयमार्यमतिरिति। एतच्छास्त्रं। सकलशास्त्रार्थसूचनात्। ननुप्रकरणमिदमाह॥ ॥समस्तायेयर्थाःस्व
र्थाः कृत्स्नस्यषष्टितन्त्रस्य। आख्यायिकाविरहिताः परवादविवर्जिताश्चापि॥ ॥तथाचभोजवार्त्ति
कं। प्रधानास्तित्वमर्थवत्त्वमथास्यता। परार्थ्यंचतथानेकंवियोगोयोगएव। शेषवृत्तिरकर्तृत्वमौलिका
र्थाः स्मृतादृशा। विपर्ययः पंचविधस्तथोक्तमिवतृष्य। करणनामसामर्थ्यमशक्तिरितिधामते। इतिष
ष्टिःपदार्थानामशक्तिभिःसद्भिसिद्धिमिरिति। सेयंषष्टिपदार्थीकथितेतिसकलशास्त्रार्थकथनानेदं प्र
करणं। अपितुशास्त्रमेवेदमितिसिद्धं। एकत्वपारार्थ्यमर्थवत्त्वंचप्रधानमधिकृत्योक्तं। अन्यत्वमकर्तृत्वंब
हुत्वंपुरुषमधिकृत्याअस्तित्वंयोगोवियोगश्चेतुभयमधिकृत्य। शेषवृत्तिः स्थितिरितिस्थूलसूक्ष्ममधिकृत्य

मनांसिकुमुदानीत्यबोधयंति सतां सदा। श्रीवाचस्पतिमिश्राणांकृतिः स्तात्तत्त्वकौमुदी ॥ ॥ ७ ॥ ॥
इतिश्रीवाचस्पतिमिश्राणां - - - - सांख्यतत्त्वकौमुदी समाप्ताः ॥ श्रीरस्तुशुभंभवतु ॥ श्रीगजाननार्पणमस्तु ॥ ॥ ७ ॥ ७ ॥

157/1935

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

सां॰त॰कौ॰
१०

॥ सांख्यतत्त्वकौमुदी ॥